No. ४३८४

Title योग सूत्र वृत्ति: राजमार्तण्ड:

Author श्री पतञ्जलि: भोजदेव:

Extent ६२ Age १५६०

Subject योग शास्त्रं

पातंजलयोगसूत्रवृत्तिः राजमार्तण्डः

४३८४

4384

41, double

= 76

४९

छ्व

पुस्तकमिदं रामचंद्रपाठकस्य

गोपीनाथेन दत्तं राघवदेवेभ्य ४

यो० सू०
१

॥ ॥ श्रीगणेशाय नमः ॥ श्रीगणपतिचरणेभ्यो नमः ॥ ह्रां ॥ देहार्द्धयोगः शिवयोः स श्रेयांसि तनोतु वः ॥
दुःखापमितिविधिस्मृत्या जनः कैवल्यमश्नुते ॥१॥ त्रिविधान्यपि दुःखानि यदनुस्मरणाद्द्रुतं । प्रयान्ति
सद्यो विलयं तं स्तुमः शिवमव्ययं ॥२॥ पतञ्जलिमुनेरुक्तिः काप्यपूर्वा जयत्यसौ । पुंप्रकृत्योर्वियो
गोपि योग इत्युदितो यया ॥३॥ जयन्ति वाचः फणिभर्तुरान्तरस्फुरत्तमःस्तोमविनाशदक्षिणः ॥
विनाश्य मानुष्यमतन्तमन्तं शिष्याः सतां मानदमध्यानि कुर्वते ॥४॥ शब्दानामनुशासनं विदधता
पातञ्जले कुर्वता वृत्तिं राजमृगाङ्कसंज्ञमपि व्यातन्वता वैद्यके । वाक्चेतोवपुषां मलः फणाभृतां
भर्त्रेव येनोद्धृतस्तस्य श्रीरणमल्लरंगनृपतेर्वाचो जयन्त्युज्ज्वलाः ॥५॥ उत्सूत्रविस्तरस्तु दृष्टविक

श्री॥
२

ख्यानालं फलं प्रकाशमनवधार्य पर्यय सम्यगर्थान्? । आर्षे पतंजलिमते विद्वद्भिर्मन्यमानत्वात् बुधजनप्रति
बोधहेतुः ॥६॥ अथ योगानुशासनं ॥ अनेन सूत्रेण शास्त्रस्य संबंधाभिधेयप्रयोजनान्याख्यापयति ॥
अथशब्दोऽधिकारार्थो मंगलार्थश्च । युक्तिर्योगः समाधानं । अनुशिष्यते व्याख्यायते ल
लक्षणभेदोपायफलैर्येन तदनुशासनं । योगस्यानुशासनं तदा शास्त्रपरिसमाप्तेरधिकृतं बोद्धव्य
मित्यर्थः । तत्र शास्त्रस्य व्युत्पाद्यतया योगः ससाधनः सफलोऽभिधेयः । तदुत्पादनं च फलं । कै
वल्यादि तस्य च योगस्य कैवल्यं फलं । शास्त्राभिधेययोः प्रतिपाद्यप्रतिपादकभावलक्षणः संबंधः
। अभिधेयस्य योगस्य तत्फलस्य च कैवल्यस्य साध्यसाधनभावः । एतदुक्तं भवति । व्युत्पाद्यस्य
वयोगस्य साधनानि शास्त्रेण प्रदर्श्यंते । तत्साधनसिद्धो योगः । कैवल्याख्यं फलमुत्पादयति ।

ह०पां

तत्र को योग इत्याह ॥ ॥ योगश्चित्तवृत्तिनिरोधः ॥ ॥ चित्तस्य निर्मलसत्वपरिणामरूपस्य या
वृत्तयोंगांगिभावपरिणामरूपास्तासां निरोधो बहिर्मुखपरिणतिविच्छेदादंतर्मुखतया प्रति
लोमपरिणामेन स्वकारणे लयो योग इत्याख्यायते स च निरोधः सर्वासां चित्तभूमीनां सर्व
प्राणिनां धर्मः कदाचित्कस्यांचिद्भूमावाविर्भवति ताश्च क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्ध
मिति चित्तस्य भूमयः चित्तस्यावस्थाविशेषाः तत्र क्षिप्तं रजस उद्रेकादस्थिरं बहिर्मुखत
या सुखदुःखादिविषयेषु कल्पितेषु सन्निहितेषु वा रजसा प्रेरितं तच्च सदैव दैत्यदान
वादीनां मूढं तमस उद्रेकात्कृत्याकृत्यविभागमंतरेण क्रोधादिभिर्विरुद्धकृत्येष्वेव नि
यमितं तच्च सदैव रक्षःपिशाचादीनां विक्षिप्तं तु सत्वोद्रेकाद्वैशिष्ट्येन परिहृत्य दुःखसा

धर्मं चित्तं समाधने चैव श्रद्धादिभिः प्रवृत्तं । तत्र सर्वदैव देवानां ऐतादृशं चित्तं वद्धानसमाधावु
पयोगि ४ । एकाग्रनिरुद्धरूपे त्वेवं सत्वोत्कर्षाद्यथोत्तरमवस्थितं ~~स्पर्शं रजस्तमस्त्वनुप्र~~
~~सत्वं भाव नप्रवृत्तिर्दर्शिता भावविरुद्ध~~ त्वात्समाधावुपयोगि । नजितामत्वादिरूपसत्वं कृत्स्नस्य
यमप्रसिद्धः ४ । इह योगविरजस्तमसोरत्यंतहेयत्वेप्येतदर्थं रजस्तमसः प्रथमसपादानं योगव
त्प्रवृत्तिर्दर्शिता । भावनिवृत्तिर्नेत्रा कृत तदर्शयितुमिति द्वयोर्थत्वा यत्नप्रदर्शनं सत्वघ
लेनदर्थं पश्चात्तदर्शनं । पञ्चधोत्कर्षेण उत्तरदेवभूमीयोगोपयोगिन्याविति । अनयोर्द्वयो
रेकाग्रनिरुद्धयोर्भूमिकयोर्मध्ये चित्तस्यैकाग्रता ... परिणामस्संप्रयोगः ४ । किमुक्तं भवति ।
एकाग्रे बहिर्वृत्तिनिरोधः ४ । निरुद्धे च सर्वासां वृत्तीनां संस्काराणां प्रविलयः ४ इत्यनयोर्द्वे

पां०२ वस्तुस्थो योगी ध्येयसंस्तवम् इदानीं सूत्रकारः [त्रा] स्वसिद्धिनिरोधपदानि व्याख्यातुकामः प्रथमं चित्तप
रिणामं विवक्षुरादौ निरोधपरिणामं तावद्दर्शयन्नाह ॥ ॥ तदा द्रष्टुः स्वरूपेऽवस्थानं । द्रष्टुः पुरुष
स्य तस्मिन् काले स्वरूपे चिन्मात्ररूपतायामवस्थानं स्थितिर्भवति । अयमर्थः । उत्पन्नविवेक
ख्यातेश्चित्तसंक्रमणात्मकवृत्त्यालिमानन्तिरुद्धो प्रोच्यमानपरिणामयोगिद्वारा आत्मनः स्वरूपे
ऽवस्थानं स्थितिर्भवति । व्युत्थानदशायां तस्य किंरूपमित्याह ॥ ॥ वृत्तिसारूप्यमितरत्र ॥ ॥
इतरत्र योगादन्यस्मिन् काले द्रष्टुरूपो वक्ष्यमाणलक्षणानां चित्तवृत्तीनां सारूप्यं तद्रूपत्वं । अयमर्थः
र्थो यावद्द्रष्टृरूपो द्रष्टा यस्तु व्युत्थानमोहात्मिका प्रादुर्भवन्ति । तादृक्स्वरूप एव प्रतिभाति तथा च
र्दर्शितं पुरुषस्य तदेव यस्मिन्नेकात्मतापरिणितं चितिशक्तेः स्वस्मिन् रूपप्रतिष्ठानं भवति ।

की॰ द॰ ५.

यस्मिंश्चेंद्रियवृत्तिद्वारेण विषयाकारपरिणतेबुद्धस्सदाकारएवपरिणामोर्थेत्यर्थः यथाजल
तरंगेषु चलत्सु चंद्रः चलन्निव प्रतिभासते तद्वित् । [illegible] । वृत्तिपदं व्याख्यातुमाह ॥४॥
वृत्तयः पंचतय्यः क्लिष्टाः अक्लिष्टाः । वृत्तयः चित्तस्य परिणामविशेषाः । वृत्तिसमुदायल
क्षणस्य अवयविनो अवयवापेक्षया वृत्तयस्सदुपेक्षया पंचतय्यः । एतदुक्तं भवति । पंचवृत्त
यः क्लिष्टाः अक्लिष्टाः । क्लेशैर्दुःसमानेनैव ध्वांतैः क्लिष्टा अक्लिष्टा विलीनाः अक्लिष्टाः । ताः ए
वपंचवृत्तयः समुद्दिश्य व्याख्यायंते ॥ ॥प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ॥ ॥ ता आसां
क्रमेण लक्षणमाह ॥ ॥ [illegible] प्रत्यक्षानुमानागमाः प्रमाणानि । अज्ञातिप्रसिद्धत्वात्प्रमाण
नीं शास्त्रकारेणोद्दिष्टपणे निवगन्तव्या लक्षणस्य न पृथक्करणे [illegible] । इतां प्रमाणल

निर

पा०

त्तां तत्र अविसंवादिज्ञानं प्रमाणमिति। इंद्रियद्वारेण बाह्यवस्तूपरागात्तद्विषया सामान्य
विशेषात्मनोऽर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं। गृहीतसंबंधाल्लिंगाल्लिंगिनि सामान्यात्म
नाऽध्यवसायोऽनुमानं। आप्तवचनमागमः। एवं प्रमाणरूपां वृत्तिं व्याख्याय विपर्ययरूपामाह॥
विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठं॥ अतथाभूतेऽर्थे तथोत्पद्यमानं ज्ञानं विपर्ययः। यथा शु
क्तिकायां रजतज्ञानं। अतद्रूपप्रतिष्ठमिति। तस्यार्थस्य यद्रूपं तस्मिन्न प्रतिष्ठितमिति। तस्यार्थस्य
यत्पारमार्थिकं रूपं न तत्प्रतिभासयतीति यावत्। संशयोऽप्यतद्रूपप्रतिष्ठत्वान्मिथ्याज्ञानं। यथा
स्थाणुर्वा पुरुषो वेति। विकल्पवृत्तिं व्याख्यातुमाह। शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः। श
ब्दजनितं ज्ञानमनुपततीति शब्दज्ञानानुपाती। वस्तुनस्तथात्वमनपेक्षमाणो योऽध्यव

मायः सविकल्पस्य विषय इति। यथा देवदत्तस्यैव चैतन्यं स्वरूपमिति। अत्र देवदत्तस्य कंबल इतिवच्छब्दज-
नितज्ञाने षष्ठ्याध्यवभासितो भेदः। नमिहापि विद्यमानमपि मात्राप्य प्रवर्त्तते। ध्रुवमायः व-
स्तुनस्तथैव चैतन्यमेव उदाहृतं। निद्रां लक्षयितुमाह॥ अभावप्रत्ययालंबना वृत्तिर्निद्रा। अभाव-
प्रत्ययालंबनं यस्याः वृत्तेर्भवतीत्युक्ता। एतदुक्तं भवति। या संततमसमुद्रिक्तत्वान्मनः समस्तविष-
यपरित्यागेन प्रवर्त्तते वृत्तिः सा निद्रा। अस्याश्च सुखमहमस्वाप्समिति स्मृतिदर्शनात् स्मृतेश्चा-
नुभवव्यतिरेकेणानुपपत्तेर्वृत्तित्वं। स्मृतिं लक्षयितुमाह॥ अनुभूतविषयासंप्रमोषः स्मृतिः।
प्रमाणेनानुभूतस्य विषयस्य योयमसंप्रमोषः। संस्कारद्वारेण बुद्धावुपारोहः सा स्मृतिः। त-
त्र प्रमाणविपर्ययविकल्पा जाग्रदवस्थाः। त एव तदनुभवबलात्प्रत्यक्षायमाणाः। तदुक्तं स्वप्नावा-

पौ॰सू॰
५

सनाद्रूपदर्शनं । प्रत्यक्षस्य सप्तमः निद्राख्यसं विद्यमानविषया । स्मृतिश्च प्रमाणविपर्ययविकल्पनि
द्रानिमित्ता । एवं वृत्तीर्व्याख्याय सोपायं निरोधं व्याख्यातुमाह ॥ ॥ अभ्यासवैराग्याभ्यां तन्नि
रोधः । अभ्यासवैराग्ये वक्ष्यमाणलक्षणे ताभ्यां [illegible] प्रकाशप्रवृत्तिनियमरूपाणां चित्तवृत्ती
नां प्रलयतिहन तासां निरोधः । किंतु सर्वं भवति । तस्मां निवृत्तबाह्याभिनिवेशा मांसं तदुःखतया
सुखकारणेव विशेषाभिरूपतयावस्थानं । तत्र विषयदोषदर्शनजे वैराग्येण तद्वैमुख्यमु
त्पाद्यते । अभ्यासेन च सुखजनकशान्तप्रवाहप्रदर्शनद्वारेण दृढं स्थैर्यमुत्पाद्यते । इत्थं ता
भ्यां भवति चित्तवृत्तिनिरोधः । अभ्यासं व्याख्यातुमाह ॥ ॥ तत्र स्थितौ यत्नोऽभ्यासः ॥ वृत्ति
रहितस्य चित्तस्य स्वरूपनिष्ठः परिणामः स्थितिः । तस्यां यत्न उत्साहः पुनःपुनस्तत्त्वेन चे

श्रीः
५

नाभिनिवेशनं अभ्यासमइत्युक्तं तान्निरोधे व विशेषमाह॥ ॥स तु दीर्घकालनैरंतर्यसत्कारासेवितो
दृढभूमिः॥ दीर्घकालं नैरंतर्येणादरातिशयेन च सेव्यमानो दृढभूमिः स्थिरो भवति। दार्ढ्यं प्राप्न
वतीत्यर्थः॥ ॥वैराग्यलक्षणमाह॥ ॥दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैरा
ग्यं॥ द्विविधो विषयो दृष्ट आनुश्रविकश्च। दृष्ट इहैवोपलभ्यमानः शब्दादिः देवलोकादावा
नुश्रविकः। अनुश्रूयते गुरुमुखादित्यनुश्रवो वेदः तत आगत आनुश्रविकः। तयोर्द्वयोर
पि विषययोः परिणामविरसत्वदर्शनाद्विगततृष्णस्य या वशीकारसंज्ञा ममैते वश्या नाहमेतेषां
वश्य इति। योयं विमर्शस्तद्वैराग्यमुच्यते। तन्निरोधे न विशेषमाह॥ तत्परं पुरुषख्यातेर्गुणवै
तृष्ण्यं। तद्वैराग्यं परं प्रकृष्टं। प्रथमं वैराग्यं विषयविषयं द्वितीयं गुणविषयं। उत्पन्नपुरुष

षविवेकख्याख्या । तारवतद्भवति । निरोधसमाधेरत्यंतानुकूलत्वात् । एवं योगस्य स्वरूपमुक्त्वा संप्रज्ञात
संप्रज्ञातस्वरूपं लक्ष्माह । वितर्कविचारानंदास्मितारूपानुगमात्संप्रज्ञातः समाधिरिति शेषः सम
म्यक्संशयविपर्यया~~ऽध्यवसाय~~रहितत्वेन प्रज्ञायते प्रकर्षेण ज्ञायते तेनाध्यस्य स्वरूपं येन स संप्रज्ञा
तः समाधिर्भावनाविशेषः स वितर्कादिभेदाच्चतुर्विधः सवितर्कः सविचारः सानंदः सास्मि
तश्चेति । ~~भुवनादिविषयी~~भावना भाव्यस्य विषयांतरपरिहारेण चेतसि पुनःपुनर्निवेशनं भा
व्यं च द्विविधं । ईश्वरस्तत्वानि च । तान्यपि द्विविधानि । जडाजडभेदात् । जडानि चतुर्विंशतिः । अजडः पु
रुषः । तत्र यदा महाभूतेंद्रियाणि स्थूलानि विषयत्वेनादाय पूर्वापरानुसंधानेन शब्दार्थोल्ले
खसंभेदेन भावना प्रवर्तते तदा सवितर्कः समाधिः । अस्मिन्नेवालंबने पूर्वापरानुस

6

धानशब्दसंकेतस्मृतिशून्यत्वेन पदार्थमात्रभावना प्रवर्त्तते। तदा निर्वितर्कः। तन्मात्रांतःकरणलक्षणं सूक्ष्मं वि
षयमालंब्य तस्य देशकालधर्मावच्छेदेन पदार्थैर्भावना प्रवर्त्तते। तदा सविचारः। तस्मिन्नेवाल
वने देशकालधर्मावच्छेदं विना धर्मिमात्रावभासित्वेन भावना क्रियमाणा निर्विचार इत्युच्यते। एवं
पर्यंतः समाधिर्ग्राह्यसमापत्तिरिति व्यपदिश्यते। यदा तु रजस्तमोलेशानुविद्धमंतःकरणसत्त्वं भाव्य
ते। तदा गुणभावाच्चितिशक्तेः सुखप्रकाशमयस्य सत्त्वस्य भाव्यमानस्योद्रेकात्सानंदः समा
धिर्भवति। अस्मिन्नेव समाधौ ये बद्धधृतयस्तत्त्वांतरप्रधानपुरुषं न पश्यंति। ते विगतदेहाहंकार
त्वाद्विदेहशब्दवाच्याः। इयं ग्रहणसमापत्तिः। ततः परं रजस्तमोलेशानभिभूतं शुद्धसत्त्वमा
लंबनीकृत्य या प्रवर्त्तते भावना तस्यां ग्राह्यस्य सत्त्वस्य न्यग्भावाच्चितिशक्तेरुद्रेकात्सत्तामात्राव

स्त पं २

द्वः पा ७

रूपत्वेन स समाधिः ॥ शुद्धसत्त्वमालंबनीकृत्य या प्रवर्त्तते भावना तस्यां ग्राह्यस्य सत्त्वस्य न्यग्भावाच्चि-
च्छक्तेरुद्रेकात् सत्तामात्रावशेषत्वेन समाधिः सास्मित इत्युच्यते। न चाहंकारास्मितयोरभेदः शंकनीयः।
यतो यत्रांतःकरणमहमित्युल्लेखेन विषयान्वेदयते सोहंकारः। यत्रांतर्मुखतया प्रतिलोमप-
रिणामेन प्रकृतिलीने चेतसि सत्तामात्रमवभाति सास्मिता। अस्मिन्नेव समाधौ ये कृततोषाः परं
परमात्मानं पुरुषं न पश्यंति। तेषां चेतसि स्वकारणे लयमुपगते प्रकृतिलया इत्युच्यंते। ये परं पु-
रुषं ज्ञात्वा भावनायां प्रवर्त्तंते। तेषामियं विवेकख्यातिर्ग्रहीतृसमापत्तिरित्युच्यते। तत्र सवित-
र्के समाधौ चतस्रोवस्थाः शक्तिरूपतयावतिष्ठंते। तत एकैकस्यास्त्यागेनोत्तरोत्तरावस्थाः इति
चतुरवस्थोयं संप्रज्ञातः समाधिः। असंप्रज्ञातमाह॥ ॥विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोन्यः।

श्रीः ८

७

व२ न्या२

विरम्यते अनेनेति विरामः। वितर्कादिचिन्तात्यागः। विरामश्चासौ प्रत्ययस्तस्याभ्यासः पूर्वो नः यु
येन चेतसि निवेशनं। तथया काविद्वद्विकल्पस्तति तस्याभ्यासे इति नेति नेति नैरन्तर्येण पर्यालोचनं। तत्पू
र्वः संप्रज्ञातसमाधिसंस्कारावशेषोऽन्यस्त्विलक्षणोऽसंप्रज्ञात इत्यर्थः। न तत्र किञ्चिद्वेद्यं सं
प्रज्ञायत इत्यसंप्रज्ञातो निर्बीजः। इह चतुर्विधश्चित्तस्यापरिणामः। व्युत्थानं समाधिप्रारम्भो
निरोधः। एकाग्रता च। तत्र क्षिप्तमूढे चित्तस्य भूमी व्युत्थानं। विक्षिप्ता भूमिः सत्वोद्रेकात्समाधिप्रा
रम्भः। निरुद्धैकाग्र्ये पर्यन्तभूमी प्रतिपरिणामं च संस्काराः। तत्र व्युत्थानजनिताः संस्काराः स
माधिप्रारम्भजैः संस्कारैर्हन्यन्ते। तज्जाश्चैकाग्रताजनितैः संस्कारैर्निरोधजैः। निरोधजाः

ॐ। टिको श्रयता० चित्त२

पां० वृ

१

ज्ञा २

संस्काराः क्षयं व्रज्यन्ते । यथा सुवर्णसंवलितं ध्मायमानं सीसमात्मानं सुवर्णमलं च निर्द्द-
हति । एवमेकाग्रताजनितान् संस्कारान् निरोधजाः आत्मानं च निर्दहंति । तदेवं योगस्य
स्वरूपं लक्षणं सोपायो पायं चाभिधाय विस्तरेणोपायं योगस्यापि दर्शनपूर्वकमुपक्रम-
ते । भवप्रत्ययो विदेहप्रकृतिलयानां । विदेहाः प्रकृतिलयाश्च वितर्कादिभूमिकाः । सूत्रे-
ण व्याख्याताः । तेषां समाधिर्भवप्रत्ययः । भवः संसारः । भव एव प्रत्ययः कारणं यस्य स भव-
प्रत्ययः । अयमर्थः । आविर्भूतमात्र एव ते यस्मात्तथाविधसमाधिभाजो भवंति । तेषां प-
रतत्त्वादर्शनाद्योगिनामोक्षं नतः परं तत्त्वज्ञानेन तज्ज्ञानं च बाधां च सक्तिकामन महायत्नो

श्री ४ ।

८

विधेय इत्यत्येतदर्थमुपादिष्टं तदयोषां ॥ श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषां ॥ वि
देहप्रकृतिलयव्यतिरिक्तानां योगिनां श्रद्धादिपूर्वकः । श्रद्धादयः प्रा(र्वि)उपाया यस्य स श्रद्धा
दिपूर्वकः । तेषु श्रद्धादयः क्रमादुपाया योगे यस्मात्वेन प्रवर्त्तमाना असंप्रज्ञातस्य समाधेरुपाय
तां प्रतिपद्यन्ते । तत्र श्रद्धा योगविषये चेतसः प्रसादः । वीर्यमुत्साहः । स्मृतिरनुष्ठानविष
यासंप्रमोषः । समाधिरेकाग्रता । प्रज्ञा ज्ञातव्यविवेकः । तत्र श्रद्धावतो वीर्यं जायते यो
गविषये उत्साहवान्भवति । सोत्साहस्य पश्चात्यासु स्मृतिरुत्पद्यते । तत्स्मर
णाच्च चेतः समाधीयते । समाहितचित्तश्च भावं सम्यग्विवेकेन जानाति । त एते संप्र

५ प

पा॰ द्व
९

ज्ञानतश्च समाधेरुपायाः॥ तस्यात्यासा तु परावैराग्यात् तत्त्वसंप्रज्ञानश्च समाधिः॥ उक्तोपाय
वतां योगिनां उपायलब्धलब्दानीं ह्या तीव्रसंवेगानामासन्नः॥ समाधिलाभः॥ समाधिफलं च
भवति॥ संवेगः॥ क्रियाहेतुर्दृढतमः संस्कारः॥ मृतीव्रोपेयाम धिमात्रोपायानां तत्रां समाधिला
भः॥ समाधिफलं चासन्नं भवति। शीघ्रं भवति क्षिप्रं भवतीत्यर्थः॥ कतिविधाः संवेगा इत्याह। मृ
दुमध्याधिमात्रत्वात् ततोऽपि विशेषः॥ तेष्वप्युपायेष्वपि मृद्वादिलब्धलितेष्वप्युपायवतां विशेषो
भवति। मृदुर्मध्योऽधिमात्र इत्युपायलब्धाः॥ तत्प्रत्येकं मृदुसंवेगास्तीव्रमध्यसंवेगा
तीव्रसंवेगलब्धास्त्रिधा। नवैते नव योगिनो भवन्ति। मृदूपायः॥ मृदुसंवेगः॥ मध्यसंवेग

श्रीः
९

=२गम=

॰मध्यसंवेगः। तीव्रसंवेगश्च मध्योपायः। मृदुसंवेगः। मध्यसंवेगः। तीव्रसंवेगश्च। अधिमात्रोपाय
श्च। मृदुसंवेगः। मध्यसंवेगः। तीव्रसंवेगश्च। अधिमात्रोपाय तीव्रेवसंवेगो महाप्रयत्नः कर्तव्य
श्चै इति भेदोपदेशः॥ २२॥ इदानीं एतदुपायविलक्षणं सुकरं उपायांतरं दर्शयितुमाह॥ ॥ईश्वर
प्रणिधानाद्वा॥ ईश्वरो वक्ष्यमाणलक्षणः। प्रणिधानं तत्र भक्तिविशेषः। विशिष्टमुपासनं। सर्व
क्रियाणामपि तत्रार्पणं। विषयसुखादिकं फलमनिच्छन् सर्वाः क्रियास्तस्मिन् परमगुरावर्पय
ति। तत्प्रणिधानं समाधेस्तत्फललाभस्य च प्रकृष्ट उपायः। ईश्वरस्य प्रणिधानात्समाधिलाभ इ
त्युक्तं। तत्रेश्वरस्य स्वरूपं प्रमाणं प्रभावं वाचकमुपासनाक्रमं तत्फलं च क्रमेण वक्तुमाह॥

षविशे १ श्री

पा० सू० | क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ॥ क्लिश्नन्तीति क्लेशाः ॥ अविद्यादयो वक्ष्यमाणाः । | वि हित
१० | प्रतिषिद्धव्यामिश्ररूपाणि कर्माणि । विपच्यन्त इति विपाकाः । कर्मफलानि जात्यायुर्भोगाः । आ | श्रो४
फलविपाकाच्चित्तभूमौ शेरत इत्याशया वासनाख्याः संस्काराः । तैरपरामृष्टं त्रिष्वपि का- | १०
लेष्वसंस्पृष्टः पुरुषविशेषः । अन्येभ्यः पुरुषेभ्यो विशिष्यत इति विशेषः । स ईश्वरः । ईशन-
शीलः । इच्छामात्रेण सकलजगदुद्धरणक्षमः । यद्यपि सर्वेषामात्मनां क्लेशादिस्पर्शो ना-
स्ति । तथापि चित्तगतास्तेषामुपदिश्यन्ते । यथा योद्धृगतौ जयपराजयौ स्वामिनः । अस्य तु त्रि-
ष्वपि कालेषु । तथाविधोपि क्लेशादिपरामर्शो नास्ति । अतः स विलक्षणो भगवानीश्वरः ।

चतथाविधमैश्वर्यमनादेःसत्त्वोत्कर्षात्सत्त्वोत्कर्षश्चास्यप्रकृष्टज्ञानादेवानचानयोर्ज्ञानैश्व
र्ययोरितरेतराश्रयत्वंपरस्परानपेक्षत्वात्तेद्वेज्ञानैश्वर्येईश्वरसत्त्वेवर्तमानेऽनादिभू
तेतेनचतथाविधेनसत्त्वेनतस्यानादिरेवसंबंधः।प्रकृतिपुरुषसंयोगवियोगयोरीश्वरेच्छाव्य
तिरेकेणानुपपत्तेः।यथेतरेषांप्राणिनांसुखदुःखमोहतयापरिणतंचित्तंनिर्मले
सात्त्विकेधर्मात्मप्रख्येप्रतिसंक्रान्तंचिच्छायासंक्रान्तंसंवेद्यंभवति।नैवमीश्वरस्यत
स्यकेवलएवसात्त्विकःपरिणामः।उत्कर्षवाननादिसंबंधेनभोग्यतयाव्यवस्थितः॥
अतःपुंसान्तरविलक्षणतयासएवेश्वरः।मुक्तात्मनांपुनःक्लेशादियो[illegible]स्त्रैःशा

स्ते१

र्षयुक्तत्वे २

पा० टी
२१

श्रोत्रैकपादैर्निवर्त्तते। अयं पुनः सर्वदैव तथाविधत्वान्न मुक्तात्मतुल्यत्वं न चेश्वराणामने
कत्वं। तयोस्तुल्यत्वे भिन्नाभिप्रायत्वात्कार्यस्यैवानुपपत्तेः। उत्कर्षापकर्षयुक्तत्वे च हेतुनाम
संभवतत्र्थ्यं प्रत्याहृत्य स्पष्ट विश्वरः। तथैव काष्ठाप्राप्तत्वादैश्वर्यस्य तस्य प्रभावमभिधाय प्रमाण
माह॥ ॥तत्र निरतिशयं सर्वज्ञत्वबीजं। तस्मिन्भगवति सर्वज्ञत्वस्य यद्बीजं। अतीतानागतादि
ग्रहणस्याल्पत्वं महत्त्वं च मूलत्वाद्बीजमिव बीजं। तच्च निरतिशयं काष्ठाप्राप्तं दृष्टा ह्य
ल्पत्वमहत्त्वादीनां धर्माणां सातिशयानां काष्ठाप्राप्तिः। यथा परमाणावल्पत्वस्याका
शे परममहत्त्वस्य। एवं ज्ञानादयोऽपि चित्तधर्मास्तारतम्येन परिदृश्यमानाः क्वचिन्नि

एवमीश्वरस्य
२१

रतिशयतामामानंत्यंति। यत्रक्वैत तन्निरतिशया या॥ स ईश्वरः॥ यद्यपि सामान्यमात्रे तु मान
श्च पर्यवसितत्वान्न विशेषप्रतिपत्तिनिमित्तं भवति। तथापि शास्त्रादस्य संज्ञादयो विशेषा
अवगंतव्याः॥ तस्य च प्रयोजनाभावे कथं प्रवृत्तिः पुरुषार्थो ऽस्य योगवियोगाभावादप्रयोजनमिति
न शंकनीयं। तस्य कारुणिकत्वात् भूतानुग्रह एव प्रयोजनं। कल्पप्रलयमहाप्रलये
षु निःशेषाणां संसारिणां उद्धरिष्यामीति तस्याभिप्रायः॥ यद्यप्येवं तत्रास्य
प्रयोजनमिति। एवमीश्वरस्य प्रमाणमभिधाय प्रभावमाह। स पूर्वेषामपि गुरुः॥ का
लेनानवच्छेदात्। आद्यानां स्रष्टॄणां ब्रह्मादीनामपि गुरुः उपदेष्टा। यतः स कालेनाव

क्रियते। अमादित्या त्वां तेषां पुत्रतादिमत्वादमिकालेन संबंधः॥ एवं प्राप्तानमुक्त्वा उपासनो
पयोगाय वाच्यवाचकमाहात्म्यं तस्य वाचकः॥ प्रणवः॥ इत्थमुक्तस्यास्येश्वरस्य वाचकः। निधाय
कः॥ प्रकर्षेणोच्चार्यते स्तूयतेऽनेन नितनोति वा प्रणवः ओंकारः॥ तयोश्च वाच्यवाचकलक्ष
णः संबंधो नित्यः॥ संकेतेन प्रकाश्यते। न तु केन चित् क्रियते। यथा पितापुत्रयोर्विद्यमा
नः संबंधोऽस्यायं पिताऽस्यायं पुत्र इति केनचित्प्रकाश्यते॥ ॥ उपासनमाह॥ ॥त
ज्जपस्तदर्थभावनं। तस्य सार्द्धत्रिमात्रस्य (स्वप्रणव) प्रणवस्य जपो यथावदुच्चारणं। तद्वाच्यस्येश्वरस्य भा
वनं। पुनः पुनश्चेतसि निवेशनं। एकाग्रताया उपायः॥ अतः समाधिसिद्धये योगि

नारायणेनोज्झप्यस्व सर्वार्थस्वलाभनायस्वत्कर्मेन भवति। उपासनाद्याः फलमाहात्म्यं प्रत्ययेन नाधिग-
मोप्यंतद्विद्यायाः स्वस्था। तस्मात् रूपान्तर्वर्थस्वभावनायाः गिमः प्रत्ययेन नाधिगमो भवति। विघ-
यशाति रूपेण स्थांतःकरणं निस्त्रवमेवति। या [illegible] त्वं नाहं हूत्रा। क्रिमः प्रत्यक्षं च [illegible] नना-
त्स्याधिगमो ज्ञानं भवति। अंतरायाः वक्ष्यमाणाः स्वेषां भवाः। आक्रिप्रतिबंधो भवति। अथ के
तेऽन्तरायाः इत्यत आह ॥ व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रांतिदर्शनालब्ध-
भूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः। नवैते रजस्तमोबलात् प्रवर्तमानाः
चित्तस्य विक्षेपा भवंति। तत्रैकाग्रतां विरोधित्वात् चित्तं विक्षिपन्तस्तत्सर्वथा। तत्र व्याधिर्धा-

तु चित्तस्य इति । तिस्रो धातवो रसादिश्च स्त्यानमकर्मण्यता चित्तस्य । उभयकोट्यालंबनं विज्ञानं
संशयः योगश्रद्धानाभाव इति । प्रमादोऽनुष्ठानशीलता समाधिसाधनेष्वौदासीन्यं आलस्यं
कायचित्तयोर्गुरुत्वं । योगविषये प्रवृत्त्यभावहेतुः अविरतिश्चित्तस्य विषयसंप्रयोगात्मा
गर्द्धः भ्रान्तिदर्शनं शुक्तिकायां रजतवद्विपर्ययज्ञानं । अलब्धभूमिकत्वं कुतश्चिन्निमित्तात्स-
माधिभूमेरलाभः । अनवस्थितत्वं लब्धायामपि समाधिभूमौ चित्तस्य न तत्र प्रतिष्ठा ॥
न एते समाधेरन्तःकार्ये मार्गाय यथायोगं प्रतिपक्षत्वादन्तराया इत्युच्यन्ते । विक्षेपकारणान्यप्य-
न्यामन्तराया इति प्रादर्शयितुमाह ॥ दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभु-

सु१

वः॥ एतन्निमित्तादुत्पन्नेषु विक्षेपेष्वेते दुःखादयः प्रवर्त्तंते। तत्र दुःखं चित्तस्य राज
सः परिणामः बाधनालक्षणः। यद्बाधात्प्राणिनस्तदुपघाताय प्रवर्त्तंते। दौर्मनस्यं
बाह्याभ्यंतरैः कारणैर्मनसो दौःस्थ्यं। अंगमेजयत्वं सर्वांगीणो वेपथुरासनमनःस्थैर्यस्य
बाधकः। प्राणो यद्बाह्यं वायुमाचामति स श्वासः। यत्कौष्ठ्यं वायुं निःश्वसिति स प्रश्वासः।
त एते विक्षेपैः सह प्रवर्त्तमाना यथोदिताभ्यासवैराग्याभ्यां निरोद्धव्या इत्येषामु
पदेशः। सोपद्रवविक्षेपप्रतिषेधार्थमुपायांतरमाह॥ ॥तत्प्रतिषेधार्थमेकत
त्त्वाभ्यासः। तेषां विक्षेपाणां प्रतिषेधार्थमेकस्मिन्कस्मिंश्चिदभिमततत्त्वेऽभ्यास

रय ८
मज्याप

पा० १
१४
14

चेतसि पुनः पुनः निवेशनं कुर्यात् । यद्वा ता(१) त्मतत्वकदिनायां एकाग्रतायां तद्विघ्ने पा० प्रशम
नुपायं इति इदानीं चित्तसंस्कारापादिकां परिकर्मकथयन् उपायांतरमाह । मैत्रीकरुणा
मुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनं । मैत्री सौहा
र्द्दं करुणा कृपा मुदिता हर्षः उपेक्षा औदासीन्यं । एता यथाक्रमं सुखितेषु दुःखित
षु पुण्यवत्सु विभावयेत् । तथाहि सुखितेषु साध्वेषां सुखित्वमिति मैत्रीं कुर्यात्
न त्वीर्ष्यां । दुःखितेषु कथं नु नामैषां दुःखनिवृत्तिः स्यादिति कृपां कुर्यान्न ताटस्थ्यं
। पुण्यवत्सु पुण्यानुमोदनेन हर्षं कुर्यात् । न तु किमेते पुण्यवंत इति द्वेषं । अपुण्ये

अपुण्यव त्सु ५

१४

नै ष्कर

वल्कुर्य ईदासीयमेवसावपेक्षानुमोदनैर्मद्वेषं। सुखेषुदुःखखादिशाद्वेष्यवंतः ४ प्र
तिपादितास्४ तदेवं मिथ्यापरिकर्मिणां विक्षेप्रसादनिसुखेनसमाधेराविर्भावात
वनितापरिकर्मविनेढाढ्यंकर्मतथाव। निजकालेनाहत्यात्समाप्नुयाद्धिंफलेनपरस्का
लंलोपयुतिहतोस्पातां मिश्रयणोमूलहद्विधनेमासेनपंचकञातस्पलफलेक्यंव
द्धिविहीनश्चातं। दृष्टं दर्षेण सखेकिंमूलं किंवनश्चाफलं। मिश्रकादिद्यवहासातिन
नित्यस्यस्येसकलितादिकर्मोपकारकत्वो[illegible]र्थनिकर्मनित्यस्येप्रस्तवति। एवंम
गढेसादिप्रतिपद्यपूर्तमिश्रादिमावनयासमुत्यादिनप्रसादंविशंसंप्रज्ञातादि

पा॰ सू
१५
१५
५ स्पां

समाधियोगपं संप्रज्ञाता रागद्वेषा विवक्षु ख्यातमाखेदमुत्थाय यन्तश्चा । तोयेत्स्वयं न्मूलिते
ध्याता । नदा प्रसन्नत्वान्मनसो नवत्येविकायता । उपायांतरमाह । प्रछर्दणविधार
णाभ्यां वा प्राणस्य । प्रछर्दनं यत्कौष्ठ्यस्य वायोः प्रयत्नविशेषान्मात्राप्रमाणेन ब
हिर्निःसारणं । विधारणं मात्राप्रमाणेनैव प्राणस्यायामो ना ति विछेदश्च सवद्वाभ्यां
प्रकाराभ्यां ■■ बाह्याभ्यंतरपूरणेन । पूरितस्य वा तस्यैव निरोधेन । तदेवं रेचकपूरक
कुंभकलदेन त्रिविधः प्राणायामश्चित्तस्य स्थितिमेकाग्रतायां निबध्नाति । सर्वासा
मिंद्रियवृत्तीनां प्राणवृत्तिपूर्वकत्वात् । मनःप्राणयोश्च स्वव्यापारे परस्परमेक

१५
ब२

निरोध १

योगक्षेमत्वात्तज्जीयमानः आत्मा समस्तेंद्रियवृत्तिद्वारेण विक्षेपैकायतायां संभवति । मम

अदोषत्रयकारित्वं चाध्यागमे श्रूयते । दोषत्रयतानवमर्द्धी विक्षेपवृत्तयश्च आता । दोषनि

र्हरणद्वारेणोपक्षेकायतायां सामर्थ्यं । इदानीं उपायांतरदर्शनोपक्षेपेण संप्रज्ञा

तस्य समाधेः पूर्वरूपं कथयति ॥ विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबंधनी ॥ इति

वाक्यशेषः । विषयाः गंधरसरूपस्पर्शशब्दाः ते विद्यंते फलत्वेन यस्याः सा विषयवती प्रवृत्तिः । म

नसः स्थैर्यं करोतीति तथा हि नासाग्रे चित्तं धारयतो दिव्यगंधसंविदुपजायते । तालाग्रे रूपसं

जिह्वाग्रे रससंवित् तालुनि रूपसंवित् विक्षेपैकायतायां संभवति । अक्षियोगः फ

जिह्वामध्ये स्पर्शसंवित् जिह्वामूले शब्दसंवित् तदेवं तत्तदिंद्रियद्वारेण तस्मिन्नेव दिव्यविषये

जायमाना संवित् १

मनःस्थि

पां॰ स्व
१६
16

लमिति योगिनः श्रीमन्मास्वामोत्पादनानि ता। एवं विधमवोपायं नरमात्मा॥ विज्ञाकावाप्नोति
श्चती। प्रत्र त्रिकत्यन्ना चित्रस्य च्छितिनिबंधना ति वाक्यशेषः। ज्योतिःशब्देन माविकः प्रकाश
उच्यते। मण्डलशोभ्ययानतिशयवीर्यविघातयक्ष्याः। मात्रेतिस्मृतो ऽत्र किं विज्ञाकीविज्ञा
नः स्तुत्वमपमत्वात्सामन्नलाघ्ने काऽरञ्जः पुरिणामकृपोयक्ष्याः। मा विज्ञाकावेनमः छि
तिनिबंधना। अथ मर्थः। हृत्प्रसंपुटमध्ये प्रशांतकल्लोलज्ञानोदधिप्रख्यं विरसत्वंशा
वयतः धूर्जटिर्लोकान्सर्वद्वृत्रिपविज्ञायचेतनः छेदयत्युत्पद्यता। उपायांतरं प्रदर्श
नद्वारेणांशप्रज्ञात्तस्य समाधेर्विषयं दर्शयति॥ ॥ वानस्यागविषयंवा विज्ञांमनः

१६
न २
रहस्यानी

=ग्रत्यक्षमितबाह्येंद्रियैर्मनोमात्रेणैव यच्चनोक्तं स्वमात्मनः सम्यक् । निराश्रयीभवेत्कालं तदा
लंबनं मनालंबनं निरालंबनं यावत्तानमालंबमानो यावत्स्थितिं करोति नानारूपि वा श्रलिनी
यस्मिन्कस्मिंश्चिद्वस्तु नि?

मः स्थितिनिबंधनं स्वतीतिवाक्यार्थः ॥४॥ वीतरागं परित्यक्तविषयाभिलाषं यद्द्वितं प
रिहृतक्लेशं तदालंबनीकृतं चेतः स्थितिहेतुर्भवति । एवंविधमेवोपायांतरेणाह
हा॥ ॥स्वप्ननिद्राज्ञानालंबनं वा योगिनः चित्तं भवति । तत्स्थाने नापि न भवति । स्थि
रितिप्रतिपादयितुमाह ॥ ॥ यथाभिमतज्ञानाद्वा ॥ यथाभिप्रेते वस्तुनि बाह्ये चंद्रादा
वाभ्यंतरे नाडीचक्रादौ वा ध्यायमानो चेतः स्थिरं भवति । एवमुपायान्प्रदर्श्य फल
नानार्थमाह ॥ यथाभिमतज्ञानाद्वा ॥ यथाभिप्रेते वस्तुनि बाह्ये चंद्रादौ वाभ्यंत
रे नाडीचक्रादौ वा ध्यायमाने चेतः स्थिरं भवति । एवमुपायान्प्रदर्श्य फलसो

ध्या ४

थार्थमाह ॥ परमाणुपरममहत्त्वान्तोऽस्य वशीकारः ॥ एभिरुपायैः स्थितस्य स्थैर्यं भावयतो योगिनः सूक्ष्म
विषयभावनाद्वारेण परमाण्वन्तो वशीकारः ॥ अप्रतीघातरूपो जायते । न क्वचित्परमाणुपर्यन्ते
सूक्ष्मविषयेऽस्य मनः प्रतिहन्यत इत्यर्थः ॥ एवं स्थूलमाकाशादिपरममहत्त्वपर्यन्तं भावयतो न क्वचि
च्चित्तस्य प्रतीघात उत्पद्यते । सर्वत्र स्वातन्त्र्यं भवतीत्यर्थः ॥ एवमेभिरुपायैः संस्कृतस्य चित्तस्य कीदृ
ग्रूपं भवतीत्याह ॥ क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समा
पत्तिः ॥ क्षीणाः प्रदीर्घा[illegible] प्रायस्य तत्ता क्षीणवृत्तिस्तस्य ग्रहीतृग्रहणग्राह्येषु आत्मेन्द्रियविषयेषु तत
त्स्थतदञ्जनता समापत्तिर्भवति । तत्स्थत्वं तत्रैवैकाग्रता । तदञ्जनत्वं तन्मयत्वं । न्यग्भूते चित्ते विष

यस्यालाभमानस्यैवोत्कर्षस्तथाविधा समापत्तिः स्वरूपः परिणामो लभ्यतीत्यर्थः॥ दृष्टान्तमाह॥ ॥
अभिजातस्येव मणेः यथा जात्यस्य निर्मलस्य स्फटिकमणेस्तत्तदुपाश्रयवशात्तत्तद्रूपतापत्तिः
एवं निर्मलस्य चित्तसत्त्वस्य तत्तद्भावनीयवस्तू[illegible]परा[illegible]त्तत्तद्रूपतापत्तिः। यद्यपि ग्रहीतृग्र
ह्येष्वित्युक्तं तथापि भूमिकाक्रमवशाद्ग्राह्यग्रहणग्रहीतृष्विति बोद्धव्यं। यतः प्रथमं ग्राह्यनि
ष्ठ एव समाधिस्ततो ग्रहणनिष्ठस्ततोऽस्मितामात्ररूपे ग्रहीतरि स्थः केवलस्य पुरुषस्य ग्र
हीतुर्ग्राह्यत्वासम्भवात्। तत्र स्थूलसूक्ष्मग्राह्योपरक्तं चित्तं तत्र समापन्नं भवति। एवं ग्रह
णे ग्रहीतरि च समापन्नं बोद्धव्यं। इदानीमुक्तोपाय[illegible]व समापत्तेश्चातुर्विध्यं भेदमाह॥
शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का॥ श्रोत्रेन्द्रियग्राह्यः स्फोटरूपो वा शब्दः। अर्थो जा

पातं०
१८

शब्दार्थस्मृतिप्रविलये प्रत्युदितस्पष्टग्राह्याकारप्रतिभासतया न्यग्भूतज्ञानांश ... शून्येव
निर्वितर्का समापत्तिरेदंतरं प्रतिपादयितुमाह॥४

त्यादिशब्दानं सत्वप्रधाना बुद्धिर्द्विविधा॥ विकल्पसंकलनतोऽसौ सवितर्का समाधिः। यस्यामेते शब्दार्थ
परस्पराध्यासेन प्रतिभासंते। गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानमित्यनेनाकारेण सा सवि-
तर्का समापत्तिरुच्यते। उक्तलक्षणविपरीतां निर्वितर्कामाह। स्मृतिपरिशुद्धौ स्वरूपशून्येव
अर्थमात्रनिर्भासा निर्वितर्का॥ एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता॥ एतयैव सवित-
र्कया निर्वितर्कया च समापत्त्या सविचारा निर्विचारा चोक्ता व्याख्याता। कीदृशी सूक्ष्मविषया। सूक्ष्म
तन्मात्रेन्द्रियादि विषयो यस्याः सा तथोक्ता। एतेन पूर्वस्याः स्थूलविषयत्वं प्रतिपादितं भव-
ति। सा हि महाभूतालंबना। शब्दार्थविकल्पसहितत्वेन देशकालधर्माद्यवच्छिन्नः सूक्ष्मोऽर्थ
प्रतिभाति यस्यां सा सविचारा। देशकालधर्मादिरहितो धर्मिमात्रतया सूक्ष्मोऽर्थस्तन्मात्र

सविचारा

18

१८

ल

ड्रियरूपं तथा सतिला नियमर्थीभा निर्विचारा । अस्या एव सूक्ष्मविषया ॥४४॥ किंपर्यंतः सूक्ष्मो विषय इ
त्याह । सूक्ष्मविषयत्वं चालिंगपर्यवसानं ॥ सविचारनिर्विचारयोः समापत्त्योर्ग्राह्यसूक्ष्मे विषयत्वमणु
क्ष्मे नहलिंगपर्यवसानी नक्कविज्ञायते । नवा किंचिल्लिंगं तिगमयती त्यलिंगं प्रधानं । तत्पर्यं
तं सूक्ष्मविषयत्वं । तथा हि । गुणानां परिणामे चत्वारि पर्वाणि विशिष्टलिंगमविशिष्टलिंग
लिंगमात्रमलिंगं चेति ~~विशिष्टलिंगं प्रधानं तत्पर्यंतं सूक्ष्मविषयत्वं नमाहि~~ विशिष्ट
लिंगं ~~[illegible]~~ भूतानि । अविशिष्टलिंगं तन्मात्रेंद्रियाणि । लिंगमात्रं बुद्धिरलिंगं प्रधानमिति
नातः परं सूक्ष्ममस्तीत्युक्तं भवति । एतासां समापत्तीनां प्रकृतयोजनमाह ॥ ता एव सबीजः स
माधिः ॥ ता एवोक्तलक्षणाः ॥४६॥ समापत्तयः सबीजः समाधिरुच्यते । सहबीजेनालंबनेन

इति १

वर्त्तत सबीजः अज्ञातः समाधिरित्यत्र्या तत्। सर्वासां सालंबनत्वात्॥ अथैतरासां समापत्तीनां निर्विचारफलत्वात्। निर्विचारायाः फलमाह॥ ॥निर्विचारत्वे वैशारद्येऽध्यात्मप्रसादः॥ निर्विचारत्वं व्याख्यातं। वैशारद्यं नैर्मल्यं। सवितर्कां स्थूलविषयामपेक्ष्य निर्वितर्कायाः प्राधान्यं ततो पि सूक्ष्मविषयायाः सविचारायाः ततोपि निर्विकल्परूपाया निर्विचारायाः प्रकृष्टाभ्यासवशाद्वैशारद्ये नैर्मल्ये सत्यध्यात्मप्रसादः उपजायते। चित्तं क्लेशवासनारहितं। स्थितिप्रवाहयोग्यं भवति। एतदेव चित्तस्य वैशारद्यं। यस्मिन् सति योगिनः तस्मिन् सति किं भवतीत्याह॥ ॥ऋतंभरा तत्र प्रज्ञा॥ ऋतं सत्यं बिभर्त्ति कदाचिदपि न विपर्ययेणाच्छाद्यते। सा ऋतंभरा प्रज्ञा तस्मिन् सति भवतीत्यर्थः। तस्माद्ध्यप्रज्ञा संयोगो

पा० १ १९ · वी० २ · १९

=४ अस्यां हि प्रज्ञायां योगिनः स्थवदिति प्रज्ञायां नामपि विशेषः स्फुटेनैव रूपेण वर्णयते =

कालक्षेपं यथा च त्यजय योगी प्रकृष्टं योगं प्राप्नोति ॥ अस्याः प्रज्ञान्तराद्वैलक्षण्यमाह ॥ ॥ श्रुतानु
मानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् ॥ श्रुतमागमज्ञानं अनुमानमुक्तलक्षणं ताभ्यां
जायते प्रज्ञा सामान्यविषया । न हि शब्दलिङ्गयोरिन्द्रियवद्विशेषप्रतिपत्तौ सामर्थ्यं । इयं तु नि
र्विचारवैशारद्यसमुद्भवा प्रज्ञा ताभ्यां विलक्षणा । विशेषविषयत्वात् । अस्यामेव योगि
ना परः प्रयत्नः कर्तव्यः ॥ उक्तपदिष्टं भवति ॥ अस्याः प्रज्ञायाः फलमाह ॥ ॥ तज्जः संस्कारोऽन्य
संस्कारप्रतिबन्धी ॥ तया प्रज्ञया जनितो यः संस्कारः सोऽन्यान्संस्कारान्व्युत्थानजान्समाधिजांश्च
संस्कारान्प्रतिबध्नाति । स्वकार्यकरणाक्षमान्करोतीत्यर्थः । एतस्य स्वरूपस्य तया जनित ।

व २

पातंजि

२०

संस्कारा बलवत्वादन्यस्वरूपप्रज्ञाजनितान्संस्कारान्बाधितुं शक्नुवंति। अतस्तामेव प्रज्ञामभ्यसेदित्युक्तं भव
ति। एवं संप्रज्ञातं समाधिमभिधायासंप्रज्ञातं वक्तुमाह॥ ॥तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः॥
तस्यापि संप्रज्ञातस्य निरोधे प्रविलये सति सर्वासां चित्तवृत्तीनां स्वकारणे प्रविलयात् याया संस्कार
मात्राद्वृत्तिरुदेति तस्यां तस्यां नेति नेतीति केवलं पर्युदसनात् निर्बीजः समाधिराविर्भवति यस्मिन्सति
पुरुषः स्वरूपमात्रप्रतिष्ठो ति॰ निष्ठ४ शुद्धो भवति। तदत्राधिकृतस्य योगस्य लक्षणं चित्तवृत्तिपदा
नां च आख्यानमभ्यासवैराग्यलक्षणं चित्तवृत्तिपदानां व्याख्यानमभ्यासवैराग्यलक्षणस्तस्योपा
यद्वयस्य स्वरूपं लक्षणं अभिधाय संप्रज्ञातेतरभेदेन योगस्य मुख्यामुख्यभेदमुक्त्वा योगाभ्यासमभ्युप

२०

निरोधप

भेदमुक्त्वा योगाभ्यासप्रदर्शनंपूर्वकाद्विस्तरेणोपायान्प्रदर्श्य सुगमोपायप्रदर्शनपरतयाई
श्वरस्य स्वरूपप्रमाणप्रभाववाचकोपासनाक्रमं तत्फलानि निर्णीय चित्तविक्षेपांस्तत्सहभुवश्च
दुःखादीन्विस्तरेण च तत्प्रतिषेधोपायानेकतत्त्वाभ्यासमैत्र्यादिप्राणायामादीश्च संप्रज्ञाता
संप्रज्ञातपूर्वांगभूतान्विषयवतीप्रवृत्तिरित्यादिनाध्यायोपसंहारद्वारेण च समापत्तीस्सल
क्षणाः फलसहिताः स्वस्वविषयसहिताश्चोक्त्वा संप्रज्ञातासंप्रज्ञातयोरुपसंहारमभिधाय स
बीजपूर्वको निर्बीजः समाधिरभिहित इति व्याख्यातो योगपादः॥१॥ इति श्रीमहाराजाधिरा

पात॰
२१
21

जश्रीभोजदेवविरचितायांराजमार्त्तंडाभिधानायांपातंजलिवृत्तौयोगशास्त्रवृत्तौयोगपादः१अथमथ
तेतदुःप्रापयोगसिद्धिमिच्छायपेनदर्शितां।उपायाश्चडगाग्नाथश्रद्धोक्तंप्रार्थितामयोगतदेवंप्रथ
मपादेसमाहितचित्तस्यसोपायंयोगमभिधायव्युत्थितचित्तस्यापिकथमुपायाभ्यासपूर्वकोयोगः
सात्म्यमुपयातीतितत्साधनानुष्ठानप्रतिपादनायक्रियायोगमाह॥तपःस्वाध्यायेश्वरप्रणिधा
नानिक्रियायोगः॥१॥तपःशास्त्रांतरोपदिष्टंकृच्छ्रचांद्रायणादि।स्वाध्यायःप्रणवपूर्वाणांमंत्राणां
जपः।ईश्वरप्रणिधानं।सर्वक्रियाणांतस्मिन्परमगुरौफलनिरपेक्षतयासमर्पणं।एतानिक्रि

२१

यायोगः इत्याख्यातः । स किमर्थमित्याह समाधिभावनार्थः क्लेशतनूकरणार्थश्च । क्लेशा वक्ष्यमाणास्ते षां तनूकरणं स्वकार्यकरणप्रतिबंधः समाधिरुक्तलक्षणः तस्य भावना चेतसि पुनः पुनर्निवेश नं सोर्थः प्रयोजनं यस्य स तथोक्तः एतदुक्तं भवति एते तपःप्रभृतयोभ्यस्यमानाश्चित्तगतानवि द्यादीन्क्लेशान्शिथिलीकुर्वंतः समाधेरुपकारकतां भजंते । तस्मात्प्रथमतः क्रियायोगवि धानपरेण योगिना भवितव्यमित्युपदिष्टं भवति । क्लेशतनूकरणार्थ इत्युक्तं । तत्र के क्लेशा इत्याह अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः ॥३॥ अविद्यादयो वक्ष्यमाणलक्षणाः पंच ते बाधनालक्षणं परितापमुपजनयंतः क्लेशशब्दवाच्या भवंति । ते हि चेतसि प्रवर्तमा

पातं०
२४
२२

नाः संसारलक्षणो गुणपरिणामः हेतुर्ध्येयं ति । सत्यपि सर्वेषां तुल्ये क्लेशत्वे मूलभूतत्वादविद्यायाः प्राधान्यं प्र-
तिपादयितुमाह । अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणां ॥ अविद्या मोहः अनात्मन्यात्म-
भिमान इति यावत् । सा क्षेत्रं प्रसवभूमिरुत्तरेषामस्मितादीनां । प्रत्येकं प्रसुप्तादि भेदेन
चतुर्विधानां । यतो यत्राविद्या विपर्ययज्ञानरूपा शिथिलीभवति तत्र क्लेशानां रागादीनां
नोद्भवो दृश्यते । विपर्ययज्ञानसमुच्छेदे च तेषां सुद्भवदर्शनात् । प्रसुप्ताख्यत्वलीनानां तनूद-
राख्ययोरिति नां विच्छिन्नोदाररूपाश्चत्वारः क्लेशा विभज्यन्ते तेषां छिन्नानामपि मूलत्वमविद्यायाः प्र-
सुप्ततनुविच्छिन्नो- विच्छिन्नोदाररूपाश्चत्वारः क्लेशा विभज्यन्ते तेषां छिन्नानामपि मूलत्वमविद्यायाः

२२

दाराणामिति इह ये क्लेशाश्चित्तभूमौ स्थिताः प्रबोधकाभावे स्वं कार्यं नारभंते ते प्रसुप्ता इत्युच्यंते। यथा
बालावस्थायां बालस्य हि वासनारूपेण स्थिताः अपि क्लेशाः प्रबोधकसहकार्यभावे नाभिव्यज्यंते।
तनवः ये स्वस्वप्रतिपक्षभावनया शिथिलीकृतकार्यसंपादनशक्तयो वासनावशेषतया चेतस्यवस्थिताः प्र
भूतां सामग्रीमंतरेण न स्वकार्यमारब्धुं क्षमाः। यथाभ्यासवतो योगिनस्ते। विच्छिन्नाः ये केनचिद्बलवता क्लेशेना
भिभूतशक्तयस्तिष्ठंति। यथा द्वेषावस्थायां रागः रागावस्थायां वा द्वेषः। न ह्यनयोः परस्परविरुद्धयोर्युगपत्संभवो
ऽस्ति। उदाराः ये प्राप्तसहकारिसंनिधयः स्वं स्वं कार्यमभिनिर्वर्त्तयंति। यथा सर्वदैव योगपरिपंथिनो व्युत्थानदशा
यां। एषां प्रत्येकं चतुर्विधानामपि मूलभूतत्वेन स्थिता प्यविद्यान्वयित्वेन प्रतीयते। न हि काचिदपि क्लेशानां विप

यी सा स्वयनिरपेक्षाणी स्वस्वरूपमुपलभ्यते। तथा च मिथ्यारूपायां सम्यक्ज्ञानेनातिवार्त्तितायां दग्धबीजकल्पानां ए
षां न कश्चित्परो दोषो ऽस्तीति अविद्यानिमित्तत्वमविद्यात्वयत्वेषोतिस्थीयते। अतः सर्वेष्वविद्यादेशलाज्जः। सर्वेषां
क्लेशानां छिन्नादिरूपकारित्वाद्योगिनां प्रथममेव तदुच्छेदे यत्नः कर्त्तव्य इति। अविद्याया लक्षणमाह। अनित्या
शुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या। अतस्मिंस्तत्ख्यातिराभासो ऽविद्येति अविद्यायाः सामान्यलक्षणम्।
तस्या एव भेदप्रतिपादनं। अनित्येषु घटादिषु नित्यत्वाभिमानो ऽविद्येत्युच्यते। एवमशुचिषु कायादिषु शुचित्वा
भिमानः। दुःखेषु विषयेषु सुखाभिमानः। अनात्मनि शरीरे आत्माभिमानः। एतेनापुण्येषु पुण्यभ्रमो ऽनर्थेऽर्था
र्थभ्रमो व्याख्यातः। अस्मितां लक्षयितुमाह। दृग्दर्शनशक्त्योरेकात्मतेवास्मिता। दृक्शक्तिः पुरुषः। दर्शनश

क्तिः रजस्तमोरूपामनभिभूतः सात्विकः परिणामोंतःकरणरूपः तयोर्भोग्यभोक्तृत्वेन जडाजडत्वेनात्यंतभिन्नरूपयो
रेकताभिमानोस्मितेत्युच्यते। यथा प्रकृतिर्वस्तुतः कर्तृत्वभोक्तृत्वरहितापि कर्त्र्यहं भोक्त्र्यहमिति अभिमन्यते सोयम
स्मिताख्यो विपर्यासः क्लेशः। रागस्य लक्षणमाह। सुखानुशयी रागः। सुखमनुशेत इति सुखानुशयी। सुखज्ञस्य सुखा
नुस्मृतिपूर्वकः सुखसाधने तृष्णारूपो गर्द्धो रागसंज्ञः क्लेशः। द्वेषस्य लक्षणमाह। दुःखानुशयी द्वेषः। दुःखमनु
लक्षणो। तदभिज्ञस्य स्मृतिपूर्वकं तत्साधने घृणात्मको यो निंदात्मा द्वेषलक्षणः क्लेशः। अभिनिवेशमाह। स्वरस
वाही विदुषोपि तथारूढोऽभिनिवेशः। पूर्वजन्मानुभूतमरणदुःखानुभववासनाबलाद्भयरूपः समुपजायमानः
शरीरविषयादिभिर्मम वियोगो माभूदिति अन्वहमनुबंधरूपः सर्वस्यैवाक्रिमेर्ब्रह्मपर्यंतं निमित्तं विनाप्रवर्त्तमानोऽभि
निवेशाख्यः क्लेशः। तदेवं व्यक्तज्ञानस्य क्लेशात्मकत्वादेकाग्रतायामभ्यासेन प्रथमं क्लेशाः परिहर्त्तव्याः। नचाज्ञातानां तेषां।

सका १

२४

परिहारः शक्यः कर्तुमिति तज्ज्ञानाय तेषामुद्देशं कृत्वा विभागं लक्षणं चाभिधाय स्थूलसूक्ष्मभेदभिन्नानां तेषां प्रहाणो-
पायविभागमाह ॥ ते प्रतिप्रसवहेयाः सूक्ष्माः ॥ ते सूक्ष्माः क्लेशाः ये वासनारूपेणास्थिताः न वृत्तिरूपं परिणाममारभन्ते
ते प्रतिप्रसवेन प्रतिलोमपरिणामेन हेयाः स्वकारणेऽस्मितायां कृतार्थं सवासनं चित्तं यदा प्रविष्टं भवति
तदा कुतस्तेषां निर्मूलानां संभवः ॥ स्थूलानां हानोपायमाह ॥ ध्यानहेयास्तद्वृत्तयः ॥ तेषां क्लेशानामारब्धकार्याणां याः सु-
खदुःखमोहात्मिकाः वृत्तयस्ताः ध्यानेनैव चित्तैकाग्र्यतालक्षणेन हेयाः ॥ हातव्या इत्यर्थः ॥ चित्तपरिकर्माभ्यासक्रमेण
स्थूलत्वान्नासां निवृत्तिर्भवति ॥ यथा वस्त्रादौ स्थूलो मलः प्रक्षालनमात्रेणैव निवर्तते ॥ यस्तु तत्र सूक्ष्मः स तैस्तैरुपा-
यैरुत्तापनप्रभृतिभिरेव निवर्तयितुं शक्यते ॥ एवं क्लेशातीतत्वमभिधाय कर्माशयस्याभिधातुमाह ॥ क्लेशमूलः कर्मा-
शयो दृष्टादृष्टजन्मवेदनीयः ॥ कर्माशय इत्यनेन तस्य स्वरूपमभिहितं यतो वासनारूपाण्येव कर्माणि ॥ क्लेशमूल इत्यने-

कोप २

२४

नकारणमस्तिहितेयतःकर्म्मणांशुभाशुभानांक्लेशाएवनिमित्तं।दृष्टादृष्टजन्मवेदनीयइत्यनेनफलभूमिः।अस्मिन्नेव
जन्मन्यनुभवनीयोदृष्टवेदनीयः।जन्मांतरानुभवनीयोऽदृष्टजन्मवेदनीयः।तथाहिकानिचित्पुण्यानिकर्माणिदे
वताराधनादीनितीव्रसंवेगेनकृतानीहैवजन्मनिफलंजात्यायुर्भोगलक्षणंप्रयच्छंति।यथानंदीश्वरस्यभगवन्म
हेश्वराराधनबलादिहैवजन्मनिजात्यादयोविशिष्टाःप्रादुर्भूताःएवमन्येषामपिविश्वामित्रादीनांतपःप्रभावाज्जात्या
युषी।केषांचिज्जातिरेव।तथातीव्रसंवेगेनदुष्टकर्मकृतांनहुषादीनांजात्यंतरादिपरिणामः।उर्वश्याश्चकार्त्तिकेय
वनेलतारूपतया।एवंव्यस्तसमस्तरूपत्वेनयथायोग्यंयोज्यं।इदानींकर्माशयस्यस्वभेदभिन्नंफलमाह।सतिमूलेतद्वि
पाकोजात्यायुर्भोगाः॥१३॥उक्तलक्षणाक्लेशाः।तेष्वनभिभूतेषुसत्सुकर्मणांकुशलाकुशलरूपाणांविपाकःफ
लंजात्यायुर्भोगाभवंति।जातिर्मनुष्यत्वादिः।आयुश्चिरकालंशरीरसंबंधः।भोगाविषयाःइंद्रियाणिसुखसंवित्कर्म

२५

करणलावसाधनक्षत्यत्यालोगशद्बस्य॥इदमत्रतात्पर्यं।चित्तस्थभावनादिकालसंचिताःकर्मवासनायथायथापाक।
मुपयांति।तथातथागुणप्रधानभावेनस्थिताजात्यायुर्भोगलक्षणंस्वकार्यमारभंते।उक्तानांकर्मफलत्वेनजात्यादी
नांस्वकारणकर्मानुसारेणकार्यकर्तृत्वमाह॥तेह्लादपरितापफलाःपुण्यापुण्यहेतुत्वात्॥१४॥ह्लादःसुखं।परितापो
दुःखं।ह्लादपरितापौफलंयेषांतेतथोक्ताः।पुण्यंकुशलंकर्म।तद्विपरीतमपुण्यं।तेपुण्यापुण्येकारणंयेषांतेषांभा
वस्तस्मात्।एतदुक्तंभवति।पुण्यकर्मारब्धाजात्यायुर्भोगाह्लादफलाः।अपुण्यकर्मारब्धाःपरितापफलाः।एतच्च
प्राणिमात्रापेक्षयाद्वैविध्यं।योगिनस्तुसर्वंदुःखमित्याह॥परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्चदुःखमेव
सर्वंविवेकिनः॥१५॥परिज्ञातक्लेशादिविवेकस्यदृश्यमानंसकलमेवभोगसाधनंसविषान्नवद्दुःखमेवप्रतिकूल
वेदनीयमित्यर्थः।यस्मादत्यंताभिजातोयोगीदुःखलेशेनाप्युद्विजते।यथाक्षिपात्रमूर्णातंतुस्पर्शमात्रेणैवमहतींपी

२पारि

२५

३

ङ्गमश्च भवति। नेतरदिति। तथा विवेकी स्वल्पदुःखानुवेधेनापि विरज्यते। कथमित्याह परिणामतापसंस्कारदुःखैर्वि
षयाणामुपभुज्यमानानां यथायथं गर्द्धाभिवृद्धेस्तदप्राप्तिकृतस्य दुःखस्यापरिहार्यत्वाद्दुःखैकतरसाधनत्वाच्च
सुखस्यैव दुःखरूपतेति परिणामदुःखत्वं। उपभुज्यमाने सुखसाधने तत्प्रतिपन्थिनं प्रतिद्वेषस्य सर्वदैवावस्थितत्वा
द्वेषसुखानुभवकालेऽपि तापदुःखं दुःपरिहारमिति तापदुःखता। संस्कारदुःखत्वं चास्मितानास्मिताविषयसंनिधा
ने सुखसंविद्दुःखसंविच्चोपजायमाना तथाविधमेव संस्कारमारभते। संस्काराश्च तथाविधसंविदं जनय
न्त्यपरिमितसंस्कारोत्पत्तिद्वारेण संसारानुच्छेदात्सर्वथैव दुःखत्वं। गुणवृत्तिविरोधाच्चेति। गुणानां सत्त्वरजस्तमसां या
वृत्तयः सुखदुःखमोहरूपाः परस्परमभिभाव्याभिभावकत्वेन विरुद्धा जायन्ते। तासां सर्वत्रैव दुःखानुवेधाद्दुःखत्वं। प
तदुक्तं भवति। एकान्तिकीमात्यन्तिकीं च दुःखनिवृत्तिमिच्छतो विवेकिन उक्तप्रकारेण वस्तुस्वरूपं यावत्सर्वे विषया दुः

स्वरूपतया प्रतिभातीति तस्मात्सर्वकर्मविपाको दुःखरूप एवेत्युक्तं भवति। तदेवमुक्तस्य क्लेशकर्माशयविपा
कराशेरविद्याप्रभवत्वादविद्यायाश्च मिथ्याज्ञानरूपतया सम्यग्ज्ञानोच्छेद्यत्वात्सम्यग्ज्ञानस्य च ससाधनहे।
योपादेयावधारणरूपत्वात्तदभिधानायाह॥ हेयं दुःखमनागतम्॥ भूतस्यातिक्रान्तत्वादनुभूयमानस्य च त्य
क्तुमशक्यत्वादनागतमेव संसारदुःखं हातव्यमित्युक्तं भवति। हेयहेतुमाह॥ द्रष्टृदृश्ययोः संयोगो हेयहे
तुः॥ द्रष्टा चिद्रूपः पुरुषः। दृश्यं बुद्धितत्त्वं तयोरविवेकख्यातिपूर्वको योसौ संयोगो भोग्यभोक्तृत्वेन संनिधानं
स हेयस्य दुःखस्य गुणपरिणामस्य संसारस्य हेतुः कारणम्। तन्निवृत्त्या संसारनिवृत्तिर्भवतीत्यर्थः॥ [illegible]

२६

स्य स्वर

सेश्वरनिरीश्वरनिर्वर्तितः इत्यर्थः । द्रष्टृदृश्ययोः संयोगो हेयहेतुरुक्तः । तत्र द्रष्टृस्वरूपं कार्यं प्रयोजनं चा-
ह । प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यं ॥ प्रकाशः सत्त्वधर्मः । क्रिया
प्रवृत्तिरूपा रजसः । स्थितिर्नियमरूपा तमसः । ताः प्रकाशक्रियास्थितयः शीलं स्वाभावि-
कं स्वरूपं यस्य तत्तथाविधमिति स्वरूपमस्य निर्दिष्टं । भूतेन्द्रियात्मकमिति । भूतानि स्थूलसू-
क्ष्मभेदेन पृथिव्यादीनि गंधतन्मात्रादीनि च । इंद्रियाणि बुद्धीन्द्रियकर्मेन्द्रियांतःकरणभे-
देन त्रिविधानि । उभयमेतद्ग्राह्यग्रहणरूपमात्मा स्वरूपाभिन्नः परिणामो यस्य तत्तथावि-
धमिति निर्दिश्य तेन कार्यमुक्तं ॥ भोगः कथितलक्षणः । अपवर्गो विवेकख्यातिपूर्विका सं-
सारनिवृत्तिः । तौ भोगापवर्गावर्थः प्रयोजनं यस्य तत्तथाविधं दृश्यमित्यर्थः । तस्यैव दृश्य

२म

पा॰तं॰
२३

ञ्चानावस्थारूपपरिणामात्मकत्वाद्धेयत्वेन ज्ञातव्यत्वादवस्थाः कथयितुमाह। विशेषाविशेषलिं
गमात्रालिंगानि गुणपर्वाणि॥ गुणानां पर्वाण्यवस्थाविशेषाश्चत्वारो ज्ञातव्या इत्युपदिष्टं भवति।
तत्र विशेषा महाभूतेंद्रियाणि। अविशेषास्तन्मात्रांतःकरणानि। लिंगमात्रं बुद्धिः। अलिंगमव्यक्तमित्युक्तं। स
र्वत्र गुणरूपस्याव्ययस्यान्वयित्वेन प्रत्यभिज्ञानादवश्यं ज्ञातव्यत्वं योगकाले सत्त्वादिपर्वाणि
निर्दिष्टानि। एवं हेयत्वेन दृश्यस्य प्रथमं ज्ञातव्यत्वात्तदवस्थाः प्रतिपाद्योपादेयं द्रष्टारं
व्याकर्तुमाह। द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः॥ द्रष्टा पुरुषो दृशिमात्रश्चेतनामात्रः।
मात्रग्रहणं धर्मधर्मिनिरासार्थं केचिद्धि चेतनामात्मनो धर्ममिच्छंति। स शुद्धोऽपि परिणामित्वाद्य
भावेन स्वप्रतिष्ठोऽपि प्रत्ययानुपश्यः। प्रत्यया विषयोपरक्तानि ज्ञानानि तान्यव्यवधानेन प्रतिसं

५१

क्रमाधस्तादेवमुपपद्यते। एतदुक्तं भवति। ज्ञानविषयोपरागाद्यायामेव बुद्धौ सन्निधानमात्रेणैव पुरु
षस्य दृक्पुरुषत्वमिति। स एव वाक्यद्वयेनोक्त्या हा तदर्थ एव दृश्यपक्षात्मा। दृश्यपक्षस्य प्रागुक्तलक्षणस्य प्रयो
जनमाह। तद्रूपं सन्तदर्थः४ तस्य पुरुषस्य भोक्तृत्वप्रतिपादनं नाम स्वार्थपरिहारेण प्रयोजनं।
न हि प्रधानं प्रवर्तमानमात्मनः४ किमर्थं पेक्ष्य प्रवर्तते। किंतु पुरुषस्य भोगसंपादयतीति
यद्येवं पुरुषस्य भोगसंपादनमेव प्रयोजनं। तदानीं संपादिते तस्मिंश्चरितार्थत्वात् प्रयोजनं विरतव्या
पारं स्यात्। तस्मिंश्च परिणामशून्ये शुद्धत्वात् सर्वे दुःखात्तो बंधरहितां स्युः४ न तस्य संसारोच्छे
दः स्यात्। इति चेत्। आह कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात्। यद्यपि विवेकख्याति
पर्यन्ताद् भोगसंपादनात् कथमपि कृतार्थं पुरुषं प्रति तत्र दृश्यं विरतव्यापारमपि सर्वं पुरुष

सर्वसाधारणत्वादस्यान्यंप्रत्यनष्टमप्यन्याप्यवतिष्ठते।अतःप्रधानस्यसकलभोक्तृसाधारणत्वा
न्नकदाचनापिविनाशः।एकस्यमुक्तौनसर्वेषांमुक्तिप्रसङ्गइत्युक्तंभवति॥दृश्यद्रष्ट्रोर्व्याख्या
यसंयोगंव्याख्यातुमाह॥स्वस्वामिशक्त्योःस्वरूपोपलब्धिहेतुःसंयोगः॥कार्यद्वारेणास्यलक्षणं
करोति॥स्वशक्तिर्दृश्यस्वभावःस्वामिशक्तिर्द्रष्टुःस्वरूपंतयोर्द्वयोरपिसंवेद्यसंवेदकत्वेनव्य
वस्थितयोर्यास्वरूपोपलब्धिस्तस्याःकारणंयःससंयोगः॥सचसहजभोग्यभोक्तृत्वस्व
रूपान्नान्योनहितयोर्नित्ययोर्व्यापकयोश्चस्वरूपादतिरिक्तःकश्चित्संयोगः।यदेवभोग्यस्य
भोग्यत्वंभोक्तुश्चभोक्तृत्वमनादिसिद्धंसएवसंयोगः॥तस्यापिकारणमाह॥तस्यहेतुरविद्या॥या
पूर्वंविपर्यासात्मिकामोहस्वरूपाविद्याव्याख्यातासातस्याविवेकख्यातिरूपस्यसंयोगस्यकारणं

२६: स्वमनागतमित्युक्तौ सेयं १

न्मू २

णां हिर्थं हानि क्रिया कर्म स्यात। किंतु न स्वज्ञानमित्याह तदभावात्संयोगाभावो हानं तद्दृशेः कैव
ल्यं। तस्या अविद्यायाः स्वरूप विच्छेदेन सम्यग्ज्ञानेन नोन्मूलितायां योयमलाव स्थितिस्स निरस्तका
र्यस्य संयोगस्याथन्नावः तद्धानमित्युच्यते। अयमर्थो नितस्य मूर्तद्रष्टव त्यरित्यागो युज्यते।
किंतु जातायां विवेकख्याता वविवेकनिमित्तः संयोगः स्वयमेव निवर्त्तत इति तस्य हानं तत्पाद
व सर्वसंयोगस्य हानं तदेव नित्यं कैवल्यस्यापि पुरुषस्य कैवल्यं यदविद्यापतनादेवं संयोगस्य
स्वरूपं। कारणं कार्यं च निहितं। अथ हानोपायकथनद्वारेणोपादेयकारणमाह। विवेक
ख्यातिरविप्लवा हानोपायः। अस्येयणः प्रयत्नः पुरुषः इति एवंविधस्य विवेकस्य स्याता आतिः
प्रज्ञा प्रहानस्य इदृश्य परित्यागस्यैव कारणं। कीदृशी। अविप्लवा। न विद्यते विप्लवो विच्छेदो

उपा १

पात॰
२५

=१ प्रतिपक्षभावनाबलादविद्याप्रविलये विनिवृत्तज्ञातृत्वकर्तृत्वाभिमाना रजस्तमोमलैरनभिभूता या बुद्धेरन्तर्मुखाया
=तरा॰ या चिन्तायाः सैकाति:x

तरां ख्यातिरूपो यस्याः प्रवाहः अविप्लवा । दुःखहानस्य तात्पर्यं सा विवेकख्यातिरित्युच्यते तस्यां सम्पन्नायां नि त॰
न प्रवृत्त्यायां हृष्याधिकारनिवृत्तौ सत्त्वस्यैव कैवल्यं । उत्पन्नविवेकख्यातेः पुरुषस्य यादृशी प्रज्ञा
भवति तां कथयन्न विवेकख्यातेः स्वरूपमाह । तस्य सप्तधा प्रान्तभूमिः प्रज्ञा । तस्येति उत्पन्नवि
वेकज्ञानस्य ज्ञातव्यविवेकरूपा प्रज्ञा प्रान्तभूमिः सकलसालम्बनसमाधिभूमिपर्यन्ता सप्तप्र
कारा भवति । तत्र कार्यविमुक्तिरूपा चतुःप्रकारा । ज्ञातं मया ज्ञेयं न ज्ञातव्यं किंचिदस्ति । क्षीणा
मे क्लेशाः न क्षेतव्यं किंचिदस्ति । अधिगतं मया ज्ञानं । प्राप्ता मया विवेकख्यातिरिति । प्रत्ययान्तर
परिहारेण तस्यामवस्थायामीदृश्येव प्रज्ञा जायते । ईदृशी प्रज्ञा कार्यविषये निर्मलं ज्ञानं
कार्यविमुक्तिरित्युच्यते । चित्तविमुक्तिस्त्रिधा । चरितार्था मे बुद्धिः गुणाः हताधिकाराः । गिरिशिख

स्व१ नी१

रनिपतिताऽस्वरूपावाणेर्निवृत्तिं नाङ्गीक्रियास्थं तिं कारणाऽवस्थापि स्वबोना मोहा विधानमूलकारणाना वा निश्च
येऽत्र नत्वा ब्रामी षां कृतः प्रारा स्थितानां मनस्त्वे सेमभ्या धिं क्रमियस्य तिं सुरूपप्रतिष्ठो हमिती द स्थाविष्यकार
विज्ञ विद्वाङ्कि ॥ तदेव मोहरूपांस सविषयां न स्थि प्रज्ञाया स्तुपज्ञा नायां उत्तरः ऊ शलङ्गकम्प ता । विवेक
ख्याति निमित्तं योगाङ्गानां रूपकं ॥ तत्त्वाप्येतत्व ता किं निमित्तमित्याह । योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञान
दीप्तिरा विवेकख्यातेः ॥ योगाङ्गानि वक्ष्यमाणानि । तेषामनुष्ठानात् ज्ञानपूर्वकादभ्यासादाविवेकख्या
तेरशुद्धिक्षये चित्तसत्त्वस्य प्रकाशावरणलक्षणक्लेशात्मकाशुद्धिक्षये या ज्ञानस्य दीप्तिस्तारतम्येनमा
त्विकी परिणामो विवेकख्याति पर्यन्तः स प्रसूतः स्यात तदैव विलक्षणत्वं । योगाङ्गानुष्ठानाच्छुद्धि
पञ्चत्वकानि अनुष्ठानानि योगाङ्गानि तेषामुद्देशमाह । यमनियमासन प्राणायामप्रत्याहारधा

नी१

४ दे त्रः

२४

पातं॰
२९

ं धारणाध्यानसमाधयोष्टावंगानि।२९। इह कानिचित्समाधेः साक्षादुपकारकत्वेनांतरंगाणि। यथा
धारणादीनि। कानिचित्प्रतिपक्षभूतहिंसादिवितर्कोन्मूलनद्वारेण समाधिमुपकुर्वंति। यथा यमनि
यमादयः। तत्रासनादीनामुत्तरोत्तरमुपकारकत्वं। यथा सति आसनजये प्राणायामस्थैर्यमेवमु
त्तरत्रापि योज्यं। क्रमेणैषां स्वरूपमाह। अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः।३०। तत्र हिंसा
प्राणवियोगप्रयोजनो व्यापारः। स च सर्वानर्थहेतुः। तदभावोऽहिंसा। हिंसायाः सर्वप्रकारमे
व परिहार्यत्वात्प्रथमं तदभावरूपाया अहिंसाया निर्देशः। सत्यं वाङ्मनसयोर्यथार्थत्वं। स्तेयं
परद्रव्यापहरणं। तदभावोऽस्तेयं। ब्रह्मचर्यमुपस्थसंयमः। अपरिग्रहो भोगसाधनानामस्वीका
रः। त एते हिंसादयः प्रवृत्ता यमाः। योगांगत्वेन निर्दिष्टाः। एषां विशेषमाह। जातिदेशकाल

30
३०
२९

समयानवच्छिन्नाः सार्वभौमा महाव्रतं जातिर्ब्राह्मणत्वादिः देशस्तीर्थादिः कालश्चतुर्दश्यादिः समयो ब्रा
ह्मणप्रयोजनादिः एतैश्चतुर्भिरनवच्छिन्नाः पूर्वोक्ता अहिंसादयो यमाः सर्वासु क्षिप्तादिषु चित्तभूमि
षु भवा महाव्रतमित्युच्यंते । तद्यथा ब्राह्मणं न हनिष्यामि । तीर्थे कंचन हनिष्यामि । चतुर्दश्यां न हनि
ष्यामि । देवब्राह्मणार्थव्यतिरेकेण किमपि न हनिष्यामीति । एवंविधावच्छेदव्यतिरेकेण कि
चित्क्वचित्कदाचित्कस्मिंश्चिदर्थे न हनिष्यामीत्यनवच्छिन्नाः । एवं सत्यादिषु यथायोगं योज्यं
इत्थमनियतीकृताः सामान्येनैव प्रवृत्ता महाव्रतमित्युच्यंते । न पुनः परिच्छिन्नाव
धारणा । नियमानाह । शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः । शौचं द्विविधं बाह्य
मभ्यंतरं च । बाह्यं मृज्जलादिभिः कायादिप्रक्षालनं । आभ्यंतरं मैत्र्यादिभिः चित्तमलानां प्रक्षालनं ।

तोषःसंतुष्टिः। शेषाःप्रागेवकृतव्याख्यानाः॥ एतेशौचाद्यो नियमश्चाहुवाः॥ कथमेषांयोगांगत्व
मित्याह॥ वितर्कबाधनेप्रतिपक्षभावनं॥ वितर्क्यंतइति वितर्काःयोगस्यविपरिपंथिनो हिंसादयः॥ त
षांप्रतिपक्षभावनेसतियदाबाधाभवति तदायोगः सुकरोभवतीत्यर्थः॥ इतितत्वयो यमनियमानां
योगांगत्वं॥ इदानींवितर्काणांस्वरूपंभेदंप्रकारंकारणं॥ फलंचक्रमेणाह॥ वितर्काहिंसाद
यः कृतकारितानुमोदितालोभक्रोधमोहपूर्वकामृदुमध्याधिमात्रा दुःखाज्ञानानंतफ
ला इतिप्रतिपक्षभावनं॥ एतेपूर्वोक्ताहिंसादयः॥ प्रथमंत्रिविधाभिधाता॥ कृतकारितानुमोदनभे
देन॥ तत्रस्वयंनिष्पादिताःकृताः॥ कुरुकुर्वितिप्रयोजकव्यापारेणसमुत्पादिताःकारिताः॥
अन्येनक्रियमाणाःसाध्वित्यंगीकृतानुमोदिताः॥ एतच्चत्रैविध्यंपरस्परव्यामोहनिवारणायोच्य

क्रोध२

तोऽत्यर्थमुदमतिरेवं मन्यते न मया स्वयं हिंसा कृतेति तेनाभिमतो भवति। एतेषां कारणप्रतिपादना-
याह। लोभमोहमूला इति। यद्यपि लोभः प्रथमं निर्दिष्टः तथापि सर्वक्लेशानां मोहस्यानात्मन्या-
त्माभिमानलक्षणस्य निदानत्वात्। तस्मिन्सति स्वपरविभागपूर्वकत्वेन लोभक्रोधादीनामुद्भवात् मूल-
त्वमवसेयम्। मोहपूर्विका सर्वदोषजातिरित्यर्थः। लोभस्तृष्णा। क्रोधः कृत्याकृत्यविवेकोन्मूलकं ज्वलना-
त्मकश्चित्तधर्मः। प्रत्येकं कृतादिभेदेन त्रिप्रकारा अपि हिंसादयो मोहादिकारणत्वेन त्रिधा भिद्यन्ते।
एषामेव पुनरवस्थाभेदेन त्रैविध्यमाह। मृदुमध्याधिमात्रा मृदवो मन्दा न तीव्रा नापि मन्दा मध्याः। अ-
धिमात्रास्तीव्राः। पश्चात्त्रयाणां नवभेदा इत्थं त्रैविध्यात्सप्तविंशतिर्भवन्ति। मृद्वादीनामपि प्रत्येकं मृदुम-
ध्याधिमात्रभेदात्त्रैविध्यं संभवति। यथायोग्यं योज्यं। तद्यथा मृदुमृदुर्मध्यो मृदुस्तीव्र इति। एषां

४जाति

२ धर्माह्य

श्व:

गौ

मृदु

पा०त०

२८

32

सू २ यथा ४

फलमाह। दुःखाज्ञानानंतफलां। दुःखं प्रतिकूलतयावभासमानो राजसश्चित्तधर्मः॥ अज्ञानो
मिथ्याज्ञानं संशयविपर्ययादिरूपं। ते दुःखाज्ञाने अनंतमपरिच्छिन्नं फलं येषां ते तथोक्ताः॥
इत्थं तेषां स्वरूपकारणादिलोदनज्ञानानां प्रतिपक्षभावनया योगिना परिहारः कर्त्तव्य इत्यर्थः॥ इत्थं प्र
तिष्ठं भवति। एषामभ्यासात्मकर्षे गच्छतामनुनिष्पादिन्यः सिद्धयो भवंति। तथा क्रमेण प्रतिपाद
यितुमाह। तत्सन्निधौ वैरत्यागः॥ तस्याहिंसां भावयतः सन्निधौ सहजविरोधिनामप्यहिनकु
लादीनां वैरत्यागो निर्मत्सरतयावस्थानं भवति। हिंस्रत्वं परित्यजंतीत्यर्थः॥ सत्याभ्यासवतः
किं भवतीत्याह। क्रियाफलाश्रयत्वं। क्रियमाणा हि क्रिया यागादिकाः फलं स्वर्गादिकं प्रयच्छंति। यस्य तु
सत्याभ्यासवतो योगिनस्तथा सत्यं प्रकृष्यते। यथाकृतायामपि क्रियायां योगी फलमाप्नोति। तद्वचनात् य

३२

हिंसारत्नाः गा ३२

= विर　　　= ब्रह्मचर्यप्रतिष्ठायां　　　= अस्तेये सर्व

थकस्य क्रियामकुर्वतोपि फलंभवतीत्यर्थः। अस्तेयस्मिंस्थिर्मेवतः। फलमाह। रत्नोपस्थानं। अस्तेयं
हस्थस्यपतियोगीनदात्यौतिसंप्रतिकर्षात् निरभिलाषस्यापि सर्वत्रादिक्वा निरत्नान्युपतिष्ठंति। ब्रह्म
चर्यस्यास्य फलमाह। वीर्यलाभः। यः किलब्रह्मचर्यमभ्यास्यतितस्यतत्प्रकर्षात् निरतिशयंवीर्यं
सामर्थ्यमाविर्भवति। वीर्यनिरोधोहिब्रह्मचर्यं तस्य स प्रकर्षात् शरीरेंद्रियमनःसुवीर्यंप्रकर्षमा
गच्छति। अपरिग्रहस्यास्य फलमाह। जन्मकथंतासंबोधः। कथमित्यस्यभावः कथंता जन्म
नःकथंताजन्मकथंता। तस्याःसंबोधःसम्यग्ज्ञानं। जन्मांतरेकोहमासंकीदृशः। किंकार्यकारी
तिजिज्ञासायांसर्वमेवसम्यग्जानातीत्यर्थः। नकेवलंभोगसाधनपरिग्रहएवपरिग्रहःयावदा
त्मनःशरीरपरिग्रहोपिपरिग्रहः। भोगसाधनत्वाच्छरीरस्य। तस्मिंस्तिरागात्तुबंधो हिर्मुख = ब

= अपरिग्रहस्थैर्ये ५

२२४

यामेवब्रह्मचर्येणतस्मात्त्विकज्ञानसाहुर्लीवक्ष्यपदाश्रुन८ शारीरादिपरिग्रहनिरपेक्षेणमाध्यस्थमव
लंबितोत्तदामोक्षहेतुरागादित्यागात्सम्यक्ज्ञानेहेतुर्लब्धत्वेवीसर्वापरिजन्मकथंतासंबोधः८। अक्लाय
मानांस्थितय८।नियमानाह।शौचात्स्वांगजुगुप्सापरैरसंसर्गः३२।यःशौचंभावयति।तस्यस्वांगेष्वपि
कारणस्वरूपपर्यालोचनद्वारेणजुगुप्सामहत्तुपजायते।अशुचिरयंकायोनात्राग्रहःक
र्तव्यइति।अतएवहेतुनापरैरन्यैःस्वकायवद्भिरसंसर्गः।संपर्कत्यागः८।परिवर्जनमित्यर्थः८।यः
किलस्वमेवकायंजुगुप्सते।तत्तदवद्यदर्शनात्सकथंपरकीयैस्तथाभूतैःकायैःसंपर्गमनुभव
ति।शौचस्यैवफलांतरमाह।द्विविधस्यापिशौ।चस्यफलमाहयेनफलं।सत्त्वशुद्धिसौमनस्यैकाग्र्यें
द्रियजयात्मदर्शनयोग्यत्वानिचभवंतीतिवाक्यशेषः।सत्त्वंप्रकाशसुखाद्यात्मकंतस्यशुद्धिः

३२

जस्तमोभ्यामनभिभवः सौमनस्यं खेदाननुभवेन मानसी प्रीतिः। एकाग्रता नियते विषये चेतसः स्थैर्यं। इं-
द्रियजयो विषयपराङ्मुखानामिंद्रियाणां स्वात्मन्यवस्थानं। आत्मदर्शने विवेकख्यातिरूपे चित्तस्य यो-
ग्यत्वं। शौचाभ्यासवत एतानि सत्वशुद्ध्यादीनि क्रमेण प्रादुर्भवंति। यथा हि सत्वशुद्धिः सत्वशुद्धेः सौमन-
स्यं। सौमनस्यादैकाग्र्यं। ऐकाग्र्यादिंद्रियजयः। इंद्रियजयादात्मदर्शनयोग्यतेति। संतोषाभ्यासस्य
फलमाह। संतोषादनुत्तमः सुखलाभः॥ संतोषप्रकर्षेण योगिनस्तथाविधमांतरं सुखमाविर्भवति य-
स्य बाह्यं विषयसुखं शतांशेनापि न समं। तपसः फलमाह। कायेंद्रियसिद्धिरशुद्धिक्षयात्तपसः॥ सम-
भ्यस्यमानं तपश्चेतसः क्लेशादिलक्षणाशुद्धिक्षयद्वारेण कायेंद्रियाणां सिद्धिमुत्कर्षमादधाति॥
कायस्य यथेच्छमणुत्वमहत्वादीनि। स्वाध्यायस्य फलमाह। स्वाध्यायादिष्टदेवतासंप्रयोगः॥ अभिप्रेत

३ समर्थवी

शौ१ तपः

१= अयमर्थः। चांद्रायणादिना चित्तक्लेशरूपः तदशुद्ध्यादिंद्रियाणां सूक्ष्मव्यवहितविप्रकृष्टदर्शनादि
सामर्थ्यमाविर्भवति=

त्व ४ द्वा २

पा तं ज
३०
२ ५

तमंत्रजपादिलक्षणो स्वाध्यायो ये प्रकृष्यमाणो योगिन इष्टयाभिधेतया देवतया संप्रयोगो भवति । सर्द्धि
वताप्यस्य प्रत्यक्षा भवतीत्यर्थः ४४ । ईश्वरप्रणिधानस्य फलमाह । समाधिसिद्धिरीश्वरप्रणिधानात् ॥
ईश्वरस्य प्रणिधानाद्भक्तिविशेषात्तस्मात् समाधेरुक्तलक्षणस्याविर्भावो भवति । यस्मात्स भगवानीश्वरः
प्रसन्नः सन्नन्तरायरूपान्क्लेशान्परिहृत्य समाधिमुद्बोधयति । यमनियमानुक्त्वा आसनमाह । स्थि
रसुखमासनं ॥ आस्यतेनेनेत्यासनं । पद्मासनदंडासनस्वस्तिकादि । तद्यदा स्थिरं निष्कंपं सु
खमनुद्वेजनीयं भवति तदा तद्योगांगतां भजते । तस्यैव स्थिरसुखत्वोपत्त्यर्थमुपायमाह । प्रयत्नशैथि
ल्यानंतसमापत्तिभ्यां । तदासनं प्रयत्नशैथिल्येनानंतसमापत्त्या स्थिरसुखं च भवतीति संबंधः ॥
यदा यदासनं बध्नामीति प्रयत्नश्शैथिल्येप्यक्लेशेनैव तदासनं निष्पद्यते । यदा वा आकाशादिगते

२ गी
३४
वा २
दा १

रयद्वा आनंत्ये नागनायके स्थिरतरफणासहस्रविधृतविश्वंभरामंडले समापन्नं चित्तमासनं निर्वर्तयतीति

क्षार

आनंत्ये वेति तत्सम्यक्समापत्तिः क्रियते अवधानेन तादात्म्यमापद्यते। तदा देहाहंकाराभावान्नासनं दुःखज
नकं भवति॥ अस्मिंश्चासनजये सति समाध्यंतरायभूता न प्रभवंति॥ अंगमेजयत्वादयः॥ एवंविधनिष्पा
दितस्य फलमाह ततो द्वंद्वानभिघातः॥ तस्मिन्नासनजये सति द्वंद्वैः शीतोष्णादिभिर्योगी नाभि
हन्यत इत्यर्थः॥ आसनजयादनंतरं प्राणायाममाह तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणाया
मः॥ आसनस्थैर्ये सति तन्निमित्तकः प्राणायामलक्षणो योगांगविशेषोऽनुष्ठेयो भवति॥ कीदृशः
श्वासप्रश्वासयोर्गतिविच्छेदलक्षणः॥ श्वासप्रश्वासौ निरुक्तलक्षणौ तयोस्त्रिधापि रेचनात्पूरणात्कु
म्भकाद्वा बाह्याभ्यंतरेषु स्थानेषु गतेः प्रवाहस्य विच्छेदो धारणं प्राणायाम उच्यते॥ तस्यैव सु
खावगमाय विभज्य स्वरूपं कथयति॥ स तु बाह्याभ्यंतरस्तंभवृत्तिः देशकालसंख्याभिः परिदृ

पा०तं०
३१
२ या

३५

टिप्पण २

=३२) दीर्घसूक्ष्मः देशोऽवधि देशेनोपलक्षितो यथा नासाद्वादशांतादौ कालेनोपलक्षितो यथा षट्त्रिंशन्मा
त्रादिप्रमाणः संख्ययोपलक्षितो यथा

ष्टो दीर्घः सूक्ष्मः ५०॥ बाह्यवृत्तिः श्वासो रेचकः अन्तर्वृत्तिः प्रश्वासः पूरकः अंतस्तंभवृत्तिः कुंभकः
तस्मिन्नजलमिव कुंभे निश्चलतया प्राणोऽवस्थाप्यत इति कुंभकः ४ त्रिविधोऽयं प्राणायामो देशेन
कालेन संख्यया चोपलक्षितो यथाऽयातो वा रामूद्धतः ४ एतावद्भिः श्वासप्रश्वासैः प्रथम उ
द्घातो भवतीत्येव तज्ज्ञानां संख्योपलक्षणं सुपाश्वं उद्घातो नाभिमूलात्प्रेरितस्य वायोः शिर
स्यभिहननं ततश्चैवं निधाय प्राणायामानां विवृत्यर्थमाह ॥ बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः ५१
प्राणायामस्य बाह्यो विषयो द्वादशान्तादिः ४ आंतरो विषयो हृदयनाभिचक्रादिः ४ ॥ तौ द्वौ वि
षयावपर्यालोच्यैव सहसा तप्तोपलनिपतितजलन्यायेन युगपत्स्तंभवृत्त्या निष्पाद्यते। अस्य
तु विषयद्वयाक्षेपको निरोधः ४ अयमपि पूर्ववद्देशकालसंख्याभिरुपलक्षितो द्रष्टव्यश्चतु
=२लोचयः स्तंभरूपो गतिविच्छेदः स चतुर्थः प्राणायामः ६) तृतीयस्मात् कुंभकाख्यात् अयमस्य विशेषः
स बाह्याभ्यन्तरौ विषयावपर्या=

३५

२ स्व

विंशस्यापि दृष्टफलमाह । ततः क्षीयते प्रकाशावरणं । तस्मात्प्राणायामात्प्रकाशस्य चित्तसत्वस्य
तद्यदावरणं क्लेशरूपं तत्क्षीयते विनश्यतीत्यर्थः । फलांतरमाह । धारणासु च योग्यता मनसः ।
धारणा वक्ष्यमाणलक्षणाः । तासु प्राणायामैः क्षीणदोषं मनः यत्र यत्र धार्यते तत्र तत्र स्थिरीभवति ।
न विक्षेपं भजते । प्रत्याहारस्य लक्षणमाह । स्वविषयासंप्रयोगे चित्तस्वरूपानुकार इवेंद्रियाणां प्रत्याहा
रः । इंद्रियाणि विषयेभ्यः प्रतीपमाह्रियंते तस्मिन्निति प्रत्याहारः । स च कथं निःपद्यत इत्याह । चक्षुरादी
नामिंद्रियाणां स्वो विषयो रूपादिस्तेन संप्रयोगस्तदाभिमुख्येन वर्तनं तदभावस्तदाभिमुख्यं परित्य
ज्य स्वरूपमात्रेऽवस्थानं । तस्मिन्सति चित्तमात्रानुकारीणींद्रियाणि भवंति । यतश्चित्तमनुवर्तमानानि म
धुकरराजमिव मक्षिकाः सर्वाणींद्रियाणि प्रतीयंते । अतश्चित्तनिरोधे तानि प्रत्याहृतानि भवंतीति । तेषां

नि१

पा॰ २
३२

२५१

तत्स्वरूपाद्यकारः ४ प्रत्याहारस्वरूपः ४ फलमस्याह। ततः परमा वश्यतेन्द्रियाणाम्। अस्याभ्यासमानेहि प्रत्याहा
रेणतथा वश्यतायथा तानीन्द्रियाणि सम्पद्यन्ते। यथा बाह्यविषयाभिमुखतां नापमानाश्च पिन यांति। तथैव
तदेवं प्रथमपादोक्तलक्षणाः अष्टयोगस्यांगाख्यात हेतोः तत्स्वरूपकारणौ फलं क्रियायोगमभिधाय हेतोः
यद्देशे यस्वरूपं कारणं फलं चोक्ता कर्मणामपि तदं कारणं स्वरूपं फलं चाभिधाय विपाकस्य स्वरूपं
फलं चाभिधाय विपाकस्य स्वरूपं कारणं चाभिहितं। ततस्याऽप्रत्वात् क्लेशादीनां ज्ञानस्य तिरस्कार
त्याग ग्रैकत्वात्तेन संचयस्याऽपरत्वाद्यस्य हेयाहेयं कारणोपादेयोपादेन कारणत्वेन चतु
र्व्यूहत्वात् हेयस्य हानस्य तिरस्कारः स्वरूपाभिधाय हानसहितं चतुर्व्यूहस्य कारणमहितम
भिधायोपादेयकारणभूतायाविवेकख्यातेः कारणभूतानामंतरं बहिरंगभावेन स्थितानां यो

= द्वै॰ ४

३९

ज्ञा॰ ६
36

=सहितं

गांगानां यमादीनां स्वरूपं फलसहितं व्याकृत्य धारणापर्यंतानां चासनादीनां परस्परमुपकार्यो
पकारकत्वेन स्थितानामुद्देशमभिधाय प्रत्येकं लक्षणपूर्वकं फलमभिहितं। एवं
योगो यमनियमादिभिः प्राप्तबीजभाव आसनप्राणायामैरंकुरितः प्रत्याहारेण पुष्पि
तो धारणाध्यानसमाधिभिः फलिष्यतीति व्याख्यातः साधनपादः॥ श्री॥ इति महाराजाधि
राजश्रीभोजदेवविरचितायां राजमार्तंडाभिधायां पातंजलयोगशास्त्रसूत्रवृत्तौ द्वितीयः साधन
पादः॥ ॥यत्पादपद्मस्मरणादणिमादिविभूतयः। जयंति तं विनामस्कृभूतनाथं श्रिये॥
तदेवमुद्दिष्टं धारणाद्यंगत्रयं निर्णेतुं संयमसंज्ञाविधानपूर्वं बाह्याभ्यंतरादिसिद्धिप्रति
पादनाय लक्षणं कर्तुमुपक्रमते। तत्र धारणायाः स्वरूपमाह। देशबंधश्चित्तस्य धारणा॥१॥
देशे नाभिचक्रे नासाग्रादौ चित्तस्य बंधः विषयांतरपरिहारेण स्थिरीकरणं सा चित्तस्य धारणे

चित्तपा२१ धे२ ना१

पातं
३३
४भजि
37

त्युच्यते। अयमर्थो मैत्र्यादि कर्मणा वा स्थानं तं करणेन यमनियमवतो जितासनेन परिहृतप्राणविक्षेपेण प्रत्याहृतेंद्रियग्रामेण निर्बाधे प्रदेशे ऋजुकायेन जितद्वंद्वेन योगिना नासाग्रादौ संप्रज्ञातस्य समाधेरभ्यासाय वेतसः स्थिरीकरणं कर्तव्यमिति। धारणामभिधाय ध्यानं धातुमाह। तत्र प्रत्ययैकतानता ध्यानं। तत्र तस्मिन्देशे यत्र चित्तं धृतं तत्र प्रत्ययस्य ज्ञानस्य या एकतानता विसदृशपरिणामपरिहारद्वारेण यत्सैव धारणायामालंबनीकृतं तदालंबनतयैव निरंतरमुत्पत्तिः सा ध्यानमित्युच्यते। चरमं योगांगं समाधिमाह। तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः। तदेवोक्तलक्षणं ध्यानं यदार्थमात्रनिर्भासं ग्राह्यार्थाकारसमावेशाद्भूतार्थरूपं प्रत्ययरूपेण ज्ञानस्वरूपेण शून्यतामिवापद्यते स समाधिरित्युच्यते। सम्यगाधीयते एकाग्रीक्रि

स्वरूपवेन१ धीर धा२

=२ अथ त्रयमेकत्र संयमः। एकस्मिन्विषये धारणाध्यानसमाधित्रयं प्रवर्त्तमानं संयमसंज्ञया शास्त्रे व्यव-
ह्रियते। तस्य परिभाषा॥ =२

यतो विद्वेषपात्परिहृत्य यत्त्र मनः समाधिः। उक्तलक्षणाद्ध्ययोगांगत्रयस्य व्यवहाराय तान्त्रिकीं संज्ञां क-
र्तुमाह। तज्जयात्प्रज्ञालोकः। तस्य संयमस्य जयादभ्यासेन सात्म्योत्पादनात्। प्रज्ञाया ज्ञानस्य विवेको-
पायाद्यालोकं प्रसारो भवति प्रज्ञा यथा संयमस्य गवनीयता विषयेषु तत्प्रयोगमाह। तस्य भूमिषु वि-
नियोगः। तस्य संयमस्य भूमिषु स्थूलसूक्ष्मालंबनभेदेन स्थितासु चित्तवृत्तिषु विनियोगः कर्तव्य
ः अधरामधरां चित्तभूमिं जितां जितां ज्ञात्वोत्तरस्यां उत्तरस्यां चित्तभूमौ संयमः कार्यः। न ह्यधरा- ली
कृताधरभूमिरुत्तरस्यां भूमौ संयमं कुर्वाणः फलं लभते च। साधनपादे योगांगान्यष्टावुद्दिश्य
पंचानां लक्षणं विधाय त्रयाणां कथं न कृतमित्याशंक्याह। त्रयमन्तरंगं पूर्वेभ्यः। पूर्वेभ्यो यमादि-
भ्यो योगांगेभ्यः पारंपर्येण समाधेरुपकारकेभ्यो धारणादियोगांगत्रयं संप्रज्ञातस्य समाधेरन्तरंगं

शुद्धानात्तृतीयमूढविविक्तप्राख्यं भूमित्रयी। निरोधः प्रकृष्टसत्त्वस्थितिर्याचेतसः परिणामः।५

पातं०
३४
38

समाधिद्वयप्रतिपादनान्तरंगं तथापि समाध्यन्तरापेक्षया बहिरंगत्वमाह। तदपि बहिरंगं निर्बीजस्य
निर्बीजस्य निरालंबनस्य शून्यभावनापरपर्यायस्य समाधेरेतदपि योगांगत्रयं बहिरंगं। पारंपर्ये
णोपकारकत्वात्। इदानीं योगसिद्धिमाख्यातुकामः प्रथमं सर्वविषयपरिशुद्धिं कथयितुं क्रमेण परिणा
मत्रयमाह। व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरि
णामः॥ तस्योव्युत्थाननिरोधाख्यौ यो जनितौ संस्कारौ तयोर्यथाक्रममभिभवप्रादुर्भावौ अ
भिभवो न्यग्भूतत्वमकार्यकरणत्वेनावस्थानं प्रादुर्भावो वर्तमानेध्वनि अभिव्यक्तरूपतया
। निरोधक्षणे चित्तस्योभयक्षणवृत्तित्वादन्वयो यः स निरोधपरिणाम इत्युच्यते। अयमर्थ
ः। यदा व्युत्थानसंस्काररूपो धर्मस्तिरोभूतो भवति निरोधसंस्काररूपश्चाविर्भवति धर्मिरूप

३८

=६ धर्मः। एकस्मिन्नेवालंबने सदृशपरिणामिता सा एकाग्रतापि चित्तस्य धर्मः तयोर्यथाक्रमं क्षयोदयौ ... धर्मस्योदयो

त्वैर

तथाच चित्तस्य यत्र द्वयोरप्यवस्थितत्वेनावस्थितं प्रतीयते तदा स निरोधपरिणामशब्देन व्यवह्रियते।
चलत्वाद्गुणवृत्तस्य यद्यपि चित्तं निश्चलं नास्ति तथाप्येवंभूतं परिणामस्थैर्यमुच्यते अ-
स्यैव फलमाह। तस्य प्रशान्तवाहितासंस्कारात्। तस्य पूर्वोक्तान्निरोधसंस्कारात्प्रशा-
न्तवाहिता भवति। परिहृतविक्षेपतया सदृशप्रवाहपरिणामि चित्तं भवतीत्यर्थः। निरोध-
परिणाममभिधाय समाधिपरिणाममाह। सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधि-
परिणामः। सर्वार्थता चलत्वान्नानाविधार्थग्रहणं चित्तस्य धर्मः। एकाग्रताल-
क्षणस्य धर्मस्य प्रादुर्भावोऽभिव्यक्तिश्चित्तस्योद्रिक्तत्वेन स्यादन्वयितयावस्थानं समाधिप- यार
रिणाम इत्युच्यते। पूर्वस्मात्परिणामादस्यायं विशेषः। तत्र संस्कारलक्षणयोर्धर्मयोरभि-

स्यवि २

वस्थाद्धर्मौ। पूर्वस्य व्युत्थानसंस्काररूपस्य धर्मस्याभिभवः। उत्तरस्य निरोधसंस्काररूपस्योद्भा
वोऽन्वयित्वेनावस्थानं। इह तु क्षयोदयौ चित्तस्य सर्वार्थतालक्षणस्य विक्षेपस्यात्यन्ततिरस्काराद
नुत्पत्तिरतीतेऽध्वनि प्रवेशः क्षयः। एकाग्रतालक्षणस्य धर्मस्योद्भवो वर्तमानेऽध्वनि प्रकटत्वमिति तृ
तीयमेकाग्रतापरिणाममाह। शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः॥१२॥ समाहि
तस्यैव चित्तस्य एकः प्रत्ययो वृत्तिविशेषः शान्तोऽतीतमध्वानं प्रविष्टः। अपरस्तूदितो वर्तमा
नेऽध्वनि स्फुरितः। द्वावपि समाहितचित्तत्वेन तुल्यौ। एकरूपालम्बनत्वेन सदृशौ प्रत्ययावुभय
त्रापि समाहितस्यैव चित्तस्यान्वयित्वेनावस्थानं स समाधिः। एकाग्रतापरिणाम उच्य
ते। चित्तपरिणामोक्तं रूपमन्यत्रातिदिशन्नाह। एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरि

त्रि॰

णामा व्याख्याताः॥ एतेन त्रिविधोक्तेन चित्तपरिणामेन भूतेन्द्रियेषु स्थूलसूक्ष्मेषु विंद्रियेषु बुद्ध्यादिकर्मान्तःकर
णे भेदेनावस्थितस्तु धर्मलक्षणावस्थालक्षणेन त्रिविधं परिणामो व्याख्यातो वेदितव्यः॥ अवस्थितस्य
धर्मिणः पूर्वधर्मनिवृत्तौ धर्मान्तरापत्तिः॥ परिणामः॥ सुलक्षणस्य धर्मिणः पिंडरूपधर्मपरित्या
गेन घटरूपधर्मापत्तिर्घटाकारा धर्मपरिणामः स्यात्॥ लक्षणपरिणामोऽप्य
या। तस्यैव घटस्यानागताध्वपरित्यागेन वर्तमानाध्वाकारस्य परित्यागेन वातीताध्वपरिग्र
हः॥ अवस्थापरिणामोऽप्य। तस्यैव घटस्य प्रथमद्वितीययोः क्षणयोरन्वयिनोऽपि चे
नंयत स्व... त्रं। ...परिणामः॥ ... अ... इ... धर्मीत्या ... धर्मिणोऽन्वच
एमा... ... ...पदे रूपधर्मानुपातो धर्मी॥ ... ...

सदृशयोः

नवपराणाविशेषः ३

=६ सामान्यात्मनाधर्मिरूपतया ×

प्रविष्टाः। उदिता ये अनागतमध्वानं परित्यज्य वर्तमानं व्यापारं कुर्वन्ति। अव्यपदेश्या ये शक्तिरूपेण स्थि-
ता व्यपदेष्टुं न शक्यन्ते। यथा सर्वं सर्वात्मकमित्येवमादयः। नियतकार्यकारणरूपया योग्यतया
वच्छिन्ना शक्तिरेवेह धर्मशब्देनाभिधीयते। तं त्रिविधमपि धर्मं योऽनुपतति अनुवर्त्तते। अन्वयित्वे
न स्वीकरोति स शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मीत्युच्यते। यथा सुवर्णं रुचकरूपधर्म
परित्यागेन स्वस्तिकरूपधर्मान्तरपरिग्रहे सुवर्णरूपतया ×६ वर्तमानं तेषु धर्मेषु कथञ्चिद्भिन्ने
षु धर्मिरूपतया विशेषात्मनावस्थितमन्वयित्वेनावभासते। एकस्य धर्मिणः कथमने
के परिणामा इत्याशङ्कामपनेतुमाह। क्रमान्यत्वं परिणामान्यत्वे हेतुः॥ धर्माणामुक्तल
क्षणानां यः क्रमस्तस्य प्रतिक्षणमन्यत्वं परिदृश्यमानं परिणामस्यो क्रमलक्षणस्यान्य

क्रमः२ मृ१

लेनानाविधत्वे हेतुर्लिंगंज्ञापकोभवति।अयमर्थःयोयंनियतक्रमोमृच्चूर्णान्मृत्पिंडस्ततःक
पालानितेभ्यश्चघटइत्येवंरूपःपरिदृश्यमानःपरिणामस्यान्यत्वमावेदयति।तस्मिन्नेव
धर्मिणियोलक्षणपरिणामस्यावस्थापरिणामस्यचक्रमःसोप्यनेनैवन्यायेनपरिणामान्य
त्वेगमकोभवति।सर्वएवभावानियतेनैवक्रमेणप्रतिक्षणंपरिणममानाःप
रिदृश्यंते।अतःसिद्धंक्रमान्यत्वात्परिणामान्यत्वं।सर्वेषांचविषयादीनांपरिणममानानां
केचिद्धर्माःप्रत्यक्षेणैवोपलभ्यंते।यथासुखादयःसंस्थानादयश्च।केचिदेकांतेनानुमा
नगम्याः।यथाकर्मसंस्कारशक्तिप्रभृतयः।धर्मिणश्चभिन्नाभिन्नरूपतयासर्वत्रानुगाम
ः।इदानीमुक्तस्यसंयमस्यविषयप्रदर्शनद्वारेणसिद्धीःप्रतिपादयितुमाहप

ततो

त्र२

पातं० ३१

रिणामत्रयसंयमादतीतानागतज्ञानं। धर्मलक्षणावस्थाभेदेन यत्परिणामत्रयमुक्तं तत्र संय
मात् ... पूर्वोक्तसंयमस्य करणादतीतानागतज्ञानं योगिनः समाधेर्भवति। इ
दमत्र तात्पर्यं अस्मिन्धर्मिणि अयं धर्म इदं लक्षणम् इयमवस्था अनागतादध्वनः समागत्य
वर्त्तमाने अध्वनि स्वव्यापारं विधायातीतमध्वानं प्रविशतीत्येवं परिज्ञानविक्षेपतया यदा संयम
करोति। संयमबलात् ... दतिक्रान्तं अनुत्पन्नं तत्सर्वं योगी जानाति। ... चित्तस्य ...
~~द्विविधिते ... यत्तदा ... विक्षेपापाय ... तमसो ...~~
स्य सर्वार्थग्रहणसामर्थ्यं ... सत्त्वप्रकाशत्वात् सर्वार्थग्रहणसामर्थ्यमेकाग्रतावश
द्वाविर्भवति। सिद्धान्तमाह। शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरस्तत्प्रविभागसं
भाविपादि ... विक्षेपैस्तैः ... यथार्थं यावदतु तैस्तैः रूपैस्तैर्विक्षेपाः ... तेन तदानीन्तनमलस्य वादर्श ... सर्वार्थग्रहणसामर्थ्यं २

४१

:रुत

यमात्मर्वं भ्रत[illegible]ज्ञानं शब्द ४ श्रोत्रेन्द्रियग्राह्यो नियतक्रमवर्णात्मा नियतेकार्थप्रतीत्यवच्छिन्न

४। यद्वा क्रमरहितः स्फोटात्मा ५ नित्यस्तु नयग्राह्यः। उभयथापि पदं रूपो वाक्यं रूपस्वात्तयो

रेवार्थप्रतिपत्तौ सामर्थ्यात्। अर्थो जातिगुणक्रियादि ४ प्रत्ययो ज्ञानं विषयाकाराणुच्छिन्न

च्छि ४। एषां शब्दार्थज्ञानानां व्यवहारे इतरेतराध्यासं त्रिन्नानाम पि बुध्येक रूपतापादना

त्संकीर्णत्वं। तथा हि गामानयेत्युक्ते शब्दोऽपि गौ लक्षणं सार्थं गोत्वजात्यवच्छिन्नं सास्नादिम

त्पिंडरूपं ज्ञानं च तद्गोचरं ज्ञानं च तद्ग्राहकमलं देतेवाश्वेव प्रतीति। न च शब्दो ग्राह्योऽव

बोधः। यो गौरिति शब्दव्यवहारो योऽयं हके ज्ञानमिति भेदेन व्यवहरति। तथा हि कोऽयं शब्दः

कोऽयमर्थः किमिदं ज्ञानमिति पृष्टः सर्वत्रैकरूपमेवोत्तरं ददाति गौरिति। सर्वथैकरूपतां न

पा.तं.
३८

प्रतिपद्यते। कथमेकस्त्वमुत्तरं प्रयच्छति। एतस्मिन्नवच्छिन्ने योऽर्थं प्रतिवक्ता। इदमत्र सूक्ष्मं तद्वाच्यं यद्वाच
कत्वं नाम ऽइदमर्थस्य यद्वाच्यत्वं। इदं ज्ञानमर्थस्य यत्प्रकाशकत्वमिति। प्रविभागं विधाय तस्मिन्प्रविभा
गेयः संयमं करोति। तस्य सर्वेषां भूतानां मृगपशुपक्षिसरीसृपादीनां यः शब्दस्तत्र ज्ञान
मुत्पद्यते। अनेनालिङ्गायत्तोतनार्यस्यातिनायं। इदं प्रसुप्ताशितडति सर्वज्ञानानि सिद्धं तत्र स
हा संस्कारसाक्षात्करणात्पूर्वजातिज्ञानं। द्विविधा ह्यमी खलु वासनारूपाः। संस्काराः केचित्
स्मृतिमात्रोत्पादनफलाः। केचिज्जात्यायुर्भोगविपाकलक्षणहेतवः। यथा धर्माधर्माद्यास्तेषु
संस्कारेषु यदा संयमं करोति। एवमयमपर्येषु संयतः। एवं मया सा क्रिया निष्पादितेति पूर्ववृ
त्तमनुसन्दधानो नानावर्णविवेकबोधमन्तरेण ज्ञायते तं हेतुं संस्कारं सर्वमतीतं स्मरति। क्रमेण सा

३७
४२
रव्याः

सौक्षाकृतेषु उद्बुद्धेषु संस्कारेषु पूर्वजन्मानुभूतानपि जात्यादीन्प्रत्यक्षेण पश्यति ॥ सिद्ध्यंतरमाह । प्रत्ययस्य
परचित्तज्ञानं । प्रत्ययस्य परचित्तस्य केनचिन्मुखरागादिना लिंगेन गृहीतस्य यदा संयमं करोति तदा परकीय
स्य चित्तस्य ज्ञानमुत्पद्यते । सरागमस्य चित्तं वीतरागं चेति । परचित्तगतानेव धर्माञ्जानातीत्यर्थः ॥ अस्यैव परचि
त्तज्ञानस्य विशेषमाह । न च सालंबनं तस्याविषयीभूतत्वात् ॥ तस्य परस्य यच्चित्तं तत्सालंबनं स्वकीयालंबनेन स
हितं न शक्यते ज्ञातुमालंबनस्य केनचिल्लिंगेनाविषयीकृतत्वात् । लिंगाच्चित्तमात्रं परस्यावगतं । न तु नीलविष
यमस्य चित्तं पीतविषयमिति वा । यच्च न गृहीतं तत्र संयमस्य कर्तुमशक्यत्वात् । न भवति परचित्तस्य यो विषयस्तत्र
ज्ञानं । तस्मात्परकीयचित्तं नालंबनसहितं गृह्यते तस्यालंबनस्यागृहीतत्वात् । चित्तधर्माः पुनर्गृह्यंत एव यदा तु कि

पा०द०
३८

मनेनालंबितमिति प्रणिधानंकरोति। तदातत्संयमान्नहिविषयमपिज्ञानस्योत्पद्यत एव॥ सिध्यंतरमाह॥ कायरूपसं
यमात्तद्ग्राह्यशक्तिस्तंभेचक्षुःप्रकाशासंयोगेंतर्धानम्॥ ॥ कायःशरीरंतस्यरूपंचक्षुर्ग्राह्योगुणस्तस्मिन्नस्य
स्मिन्कायेरूपमितिसंयमात्तस्यरूपस्यचक्षुर्ग्राह्यत्वरूपायाशक्तिःतस्यास्तंभेभावनावशात्प्रतिबंधेचक्षुःप्र
काशासंयोगेचक्षुषःप्रकाशःसत्वधर्मस्तस्यासंयोगेतद्ग्रहणव्यापाराभावेयोगिनोंतर्धीनंभवति।नकेनचि
दसौदृश्यतइत्यर्थः॥ ॥एतेनशब्दाद्यंतर्धानमुक्तम्॥ ॥एतेनैवरूपाद्यंतर्धानोपायप्रदर्शनेनशब्दादीनांश्रोत्रा
दिग्राह्याणामंतर्धानमुक्तंवेदितव्यं॥ सिध्यंतरमाह॥ सोपक्रमंनिरुपक्रमंचकर्मसंयमादपरांतज्ञानमरिष्टेभ्यो
वा॥ आयुर्विपाकंयत्पूर्वकृतंकर्मतद्द्विप्रकारं। सोपक्रमंनिरुपक्रमंचातत्रसोपक्रमंयत्फलजननायसहोप

तत्र

४२

नु २

२ किं किं ममकर्मशीघ्रविपाकं किं किं च चिरविपाकमिति

क्रमेणकार्यकरणाभिमुखेनवर्त्तते। यथोष्णप्रदेशेप्रसारितमार्द्रवस्त्रंशीघ्रमेवशुष्यति। तदेकरूपविपरीतंनि
रुपक्रमंयथा। तदेवार्द्रवासःसंवर्त्तितमनुष्णेदेशेचिरेणशोषमेति। तस्मिन्द्विविधेकर्मणियःसंयमंकरोति
अवधानदार्ढ्यात्तदपरांतज्ञानमस्योत्पद्यते। अपरांतःशरीरवियोगः तस्मिञ्ज्ञानमस्मिन्कालेऽस्मिन्दे
शेममसविपत्तीतिनिःसंशयंजानाति। अरिष्टेभ्योवाअरिष्टानित्रिविधानि। आध्यात्मिकाधिभौतिकाधिदै।
विकभेदेन। तत्राध्यात्मिकानिपिहितकर्णःकोष्ठ्यवायोर्घोषंनशृणोतीत्येवमादीनि। आधिभौतिकान्यक
स्माद्विकृतपुरुषदर्शनादीनि। आधिदैविकान्यकाण्डएवद्रष्टुमशक्यस्वर्गादिपदार्थदर्शनादीनि। तेभ्यःशरीर

गि २ उपेक्षाया भावनानास्ति। अतस्तस्यां न समाधिबलमिति

पातं०
३९
२खु

वियोगकालं जानाति। यद्यप्ययोगिनामप्यरिष्टेभ्यः प्रायेण ज्ञानमुत्पद्यते। तथापि तेषां सामान्याकारेण तत्संशयं योगिनां पुनर्नियतकालदेशतया प्रत्यक्षवदव्यभिचारि परिकर्मनिष्पादितास्ताः सिद्धीः प्रतिपादयितुमाह मैत्र्यादिषु बलानि। मैत्री करुणा मुदिता त्रयो विहितसंयमस्य बलानि। तासां मैत्र्यादीनां संबंधीनि प्रादुर्भवंति मैत्री करुणा मुदितास्तथास्य प्रकर्षं गच्छंति। यथा सर्वस्य मित्रत्वादिकं संप्रतिपद्यते। संयमं कृत्वा हस्तिबलादीनि। हस्त्यादिसंबंधि बलेषु कृतसंयमस्य तद्बलानि हस्त्यादिबलानि आविर्भवंति। तदयमर्थो यस्मिन् हस्तिबले वा वायुवेगे वा सिंहवीर्ये वा तन्मयीभावेन संयमं करोति तित्तदेव सा

मर्थ्यमुक्तं चाप्य सर्वस्य मे

55

४४

पर

ध्याज्ञाकृतेषु बुद्धेषु संस्कारेषु पूर्वजन्मानुभूतान्विजात्यादीन्प्रत्यक्षेणोपपद्यति। सिद्ध्यंतरमाह॥ प्रत्ययस्य
परचित्तज्ञानं। प्रत्ययस्य परकीयचित्तस्य केनचित्सुखरागादिना लिंगेन गृहीतस्य यदा संयमं क
रोति। तदा परकीयस्य ज्ञानमुत्पद्यते। सरागमस्य चित्तं वीतरागं चेति परचित्तगतान्सर्वान्विशे
षाञ्जानातीत्यर्थः ॥ अस्यैव परचित्तज्ञानस्य विशेषमाह॥ न च सालंबनं तस्याविषयीभूतत्वात्॥
तस्य परस्य यच्चित्तं तत्सालंबनं स्वकीयेनालंबनेन सहितं न ज्ञायते तज्ज्ञानं नास्त्यालंबनस्य केनचिल्लि
गेनाविषयीकृतत्वात्॥ सिद्ध्यंतरमाह॥ बलेषु हस्तिबलादीनि॥ हस्त्यादिसंबंधिषु बलेषु कृ
तसंयमस्य तद्बलानि हस्त्यादिबलान्याविर्भवंति। तदयमर्थो यस्मिन्हस्तिबले वा
वायुवेगे वा सिंहवीर्ये वा तन्मयीभावेन संयमं करोति। तत्तत्सामर्थ्ययुक्तत्वात्सर्वमस्य

इचित्तस्य

नेर

मा॰

पा॰३ प्रादुर्भवंति ॥ २४ ॥ सिद्ध्यंतरमाह । प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानं ॥ प्रवृत्तिर्विषयव

३९ ती ज्योतिष्मती च प्रागुक्ता तस्या यो ऽसावालोकः सात्त्विकप्रकाशप्रसरस्तस्य निखिलेषु न्यासात्तद्वास

तानां विषयाणां भावनातः तत्करणेंद्रियेषु प्रकृष्टशक्तिता माद्यं सूक्ष्मं परमाण्वादि व्य

वहितं भूम्यंतर्गतं निधानादि विप्रकृष्टं मेरुपरपार्श्ववर्ति नागरसायनादेर्ज्ञानमुत्पद्यते ।

45

एतत्समानवृत्तांतं सिद्ध्यंतरमाह । भुवनज्ञानं सूर्ये संयमात् ॥ सूर्ये प्रकाशमये [illegible] यः संयमं क ४५ यम

रोति तस्य [illegible] सप्तसु भूर्भुवःस्वःप्रभृतिषु लोकेषु या नि भुवनानि तत्र संनिवेशभांजि पुराणि तेषु य

[स सनिर

थावस्थितं ज्ञानमुत्पद्यते । पूर्वस्मिन् सूत्रे सात्त्विकप्रकाशालंबनत्वेनोक्तं [illegible] इह तु लौकिकं वि

शेषः ॥ २६ ॥ लौकिकप्रकाशालंबनद्वारेणापि सिद्ध्यंतरमाह । चंद्रे ताराव्यूहज्ञानं ॥ ताराणां ज्योतिषां यो व्यू

१शाः :मै १प्रकाशेन २तारा

ते विशिष्टः सन्निवेशं तस्मिन् यथोक्ते कृतसंयमस्य ज्ञानमुत्पद्यते। सूर्य्याहृततेजस्कत्वात् ताराणां सूर्यसंयमानन्तरं ज्ञा
नं न प्राप्नोतीति विषयमिति तदर्थम् उपायो भिहितः। ध्रुवे तद्गतिज्ञानं॥ ध्रुवे निश्चले ज्यो
तिषां प्रधाने कृतसंयमस्य तासां ताराणां या गतिः प्रत्येकं नियतकाला नियतदेशा च तस्या ज्ञा
नमुत्पद्यते। इयं तारा अयं ग्रहः इयता कालेनामुं राशिमिदं नक्षत्रं यास्यतीति सर्वं जानातीत्यर्थः॥
इदं कालज्ञानस्य फलमिति व्यक्तं भवति। बाह्याः सिद्धीः प्रतिपाद्यान्तराः प्रतिपादयितुमाह। नाभिचक्रे
कायव्यूहज्ञानं। शरीरमध्यवर्त्तिनाभिसंज्ञकं षोडशारं चक्रं तस्मिन् कृतसंयमस्य योगिनः कायग
तो यो सौ व्यूहो रसमलधातुनाड्यादीनामवस्थानं तत्र ज्ञानमुत्पद्यते। इदमुक्तं भवति। नाभिचक्रं श
रीरमध्यवर्त्ति सर्वतः प्रसृतानां नाड्यादीनां मूलभूतमतस्तत्र कृतावधानस्य समग्रं संनिवेशो यथा
वदवभाति॥ सिद्ध्यन्तरमाह। कण्ठकूपे क्षुत्पिपासानिवृत्तिः॥ कण्ठे गले कूपः कण्ठकूपः जिह्वाया मूले जिह्वातन्तोरधस्तात्कूपस्त
कूपः। गर्त्ताकारः प्रदेशः प्राणादेर्यत्संस्पर्शात् क्षुत्पिपासादयः प्रादु-

धु२
न४

पातं॰
५०

सालंबनं तु चित्तमात्रं परस्य ज्ञातं । न तु नीलविषयमस्य चित्तं पीतविषयमपि वा । यच्च न गृहीतं तत्र न संय-
मस्य कर्तुमशक्यत्वान्न परचित्तस्य यो विषयस्तत्र ज्ञानं । तस्मात्परकीयं चित्तं नालंबनसहितं । गृ-
ह्यते । तस्यालंबनस्यागृहीतत्वात् । चित्तधर्माः पुनर्गृह्यंत एव । यदा तु किमनेनालंबितमिति ।
प्रणिधानं करोति तदा तत्संयमात्तद्विषयमपि ज्ञानमुत्पद्यत एव । सिद्ध्यंतरमाह । कायरूपसंयमा-
त्तद्ग्राह्यशक्तिस्तंभे चक्षुःप्रकाशासंयोगेंऽतर्द्धानं । कायः शरीरं तस्य रूपं चक्षुर्ग्राह्यो गुणः तस्मि-
न्रूपमिति संयमाद्रूपस्य चक्षुर्ग्राह्यत्वरूपा या शक्तिस्तस्याः स्तंभे भावनाव-
शात्प्रतिबंधे चक्षुःप्रकाशासंयोगे चक्षुःप्रकाशः सत्त्वधर्मस्तस्यासंयोगे तद्ग्रहणव्यापारा-
भावे योगिनोऽंतर्द्धानं भवति । न केनचिद् दृश्यत इत्यर्थः । एतेन शब्दाद्यंतर्द्धानमुक्तं सूत्रमेतत्

४६

नैवचक्षुराद्यंतर्द्धानोपायदर्शनेन शब्दादीनां श्रोत्रादियोग्यानामंतर्द्धानमुक्तं वेदितव्यं सिद्धांतरमाह । सो
पक्रमं निरुपक्रमं च कर्म तत्संयमादपरांतज्ञानमरिष्टेभ्यो वा । आयुर्विपाकं यत्पूर्वकृतं कर्म तद्द्विप्र
कारं सोपक्रमं निरुपक्रमं च । तत्र सोपक्रमं यत्फलजननाय सहोपक्रमेण कार्यकरणाभिमुखी
नवर्त्तते यथोष्णप्रदेशे प्रसारितमार्द्रं वस्त्रं शीघ्रमेव शुष्यति । उक्तरूपविपरीतं निरुपक्रमं । य
था तदेवार्द्रं वासः संपिंडितमनुष्णे देशे चिरेण शोषमेति । तस्मिन्द्विविधे कर्मणि यः संयमं करोति ।
किमस्य कर्म शीघ्रविपाकं किं वा चिरविपाकमित्येवं ध्यानाद्दार्ढ्यात्परांतज्ञानमस्योत्पद्यते । अप
रांतः कारणं शरीरवियोगः तस्मिन्ज्ञानमस्मिन्काले अमुष्मिन्देशे मम शरीरवियोगो भविष्यतीति निःसंशयं जा
नाति । अरिष्टेभ्यो वा । अरिष्टानि त्रिविधानि । अध्यात्मिकाधिदैविकभेदेन । तत्राध्यात्मिका पि

पातं
४१

हितकर्म॥ कोऽयमस्पन्दायोर्योयं नश्यतीति। इत्येमादानि। आधिभौतिकाद्यं कस्मात्रेद्रिद्रुत उक्तपद
र्शनादीनि। आधिदैविकाद्यं काण्डवदृष्टुमग्नाकस्वर्गादिपदार्थदर्शनादीनि तेभ्यः शरीरकालंडा
मानि। यद्यपि योगिनामप्यरिष्टेभ्यः प्रायेणाज्ञानमुत्पद्यते। तथापि तत्परं न सामान्याकारेण तु स
मर्यायां योगिनां पुनर्नियतदेशकालतया प्रत्यक्षवदवस्थितिज्ञानं। परिस्मिन्कर्म निर्ध्यंदन्तासिद्धिरिति पा
क्लिमाह। मैत्र्यादिषु बलानि। मैत्रीकरुणामुदितापेक्षासुयो विहितसंयमस्य बलानि तासां मैत्र्यादी
नां तासां संबंधिनी प्रादुर्भवंति। मैत्रीमुदिताकरुणास्वथा ध्यानकर्मणि भवति। यथा सर्वद्यामित्रत्वाहि वि
प्रसन्नवदनलाति। सिद्ध्यंतरमाह। कंठकूपे क्षुत्पिपासानिवृत्तिः॥ कंठे गले कूपः॥ कंठकूपः॥ जिह्वा
यामूले जिह्वाकंठतो रधस्तात्कूपवत्कूपः॥ गर्त्ताकारप्रदेशः॥ प्राणादेर्यत्र स्पर्शात् क्षुत्पिपासादयः॥

४१

र्वंति। तस्मिन् कृतसंयमस्य योगिनः क्षुत्पिपासादयो निवर्त्तंते। घंटिकाधोन्तर्मार्गामनिरयमाने तस्मिन्न्नत्रा।
विलेन चलत्येवंविधा सिद्धिः॥ सिद्ध्यंतरमाह॥ कूर्मनाड्यां स्थैर्यं॥ कंठकूपस्याधस्ताद् हृदा कूर्माख्या नाडी। तस्यां
कृतसंयमस्य तन्मध्ये स्थैर्यमुत्पद्यते। तस्यानमनुप्रविष्टस्येव फलतानन्नवतीत्यर्थः॥३१॥ घद्विवाकाये स्थैर्य
मुत्पद्यते। न केनचित् स्पंदयितुं शक्य इत्यर्थः॥ सिद्ध्यंतरमाह। मूर्द्धज्योतिषि सिद्धदर्शनं। शिरःकपा
ले ब्रह्मरंध्राख्यं छिद्रं प्रकाशाधारत्वाज्ज्योतिः॥ यथा गृहाभ्यंतरस्थस्य मणेः प्रभा रंध्रे तिस्रजा संकुवि
काविवरप्रदेशायसंघटते। तथा हृदयस्थः सात्विकः प्रकाशः प्रसृतः ब्रह्मरंध्रं पिंडितत्वेन जाते। तत्र
कृतसंयमस्य ये द्यावापृथिव्योरंतरालचारिणः सिद्धा दिव्याः पुरुषास्तेषामितरस्य प्राप्तौ पि दृश्या
नां। तस्य दर्शनं भवति। तान्पश्यति। ते च संभाषं इत्यर्थः॥ सर्वज्ञत्वउपायांतरमाह। प्रातिभाद्वासर्वं।

न

पा॰ सं॰
५२
सर्व३

निमित्तानापन्नमनोमात्रजयं च विषयं वादं कं[illegible] कृत्यमत्य च [illegible] मानं ज्ञानं प्रतिलातुध्यानं संयमे क्रियमाणे ज्ञा
ति सति विवेकख्यातेः सर्वभावानां तारकज्ञानमुत्पद्यते यथोदेशं तिसति निरिस्वं प्र[illegible]या दुर्लभ तित द्वादिविवेक
ख्याते सर्वं तारकं विषयं ज्ञानं सा विर्लव तिं निमित्त तिलयमां भरानपेक्षं सर्वं ज्ञाता नात्यर्थः ॥ सिद्धांतरमाह
हृदये विषयं विरह हृदयं शरीरस्य प्रदेशविशेषः नाभिग्रंथो सुविवस्थल्य पुंडरीकान्यं तद्वत् करणा[illegible]
[illegible]स्थानीं तत्र [illegible] कृत्यं संयमं स्वपरचित्तज्ञानमुत्पद्यते चित्तमाननाः सर्ववासनाः परचित्तगाता
श्च रागादीन् ज्ञानातीत्यर्थः ॥ सिद्धांतरमाह ॥ सत्त्वपुरुषयोरत्यंतासंकीर्णयोः प्रत्ययाविशेषो भोगः प
रार्थात्स्वार्थसंयमात्पुरुषज्ञानं ॥ सत्त्वं प्रकाशसुखात्मकं प्राधानिकः परिणामविशेषः पुरुषोऽलो
के [illegible]धिष्ठातृरूपश्च यो नैयिलौ[illegible]रूपत्वाच्चेतनत्वात् अत्यंतासंकीर्णो भिन्नत्वमित्यर्थः ॥ [illegible]र्थः प्रत्यय परस्या

कौ
नाचेत
याया

५२

सं २

विशेषोभेदेन अविनाभावमासाना स्वलक्ष्ये वक्तृतायै। प्रत्ययेन या सुखदुःखसंवित्सा लोगः ससलवस्याश्चार्थे
नेरूपे ज्ञेणपदार्थः सुखमार्थः। तस्माद् द्व्योर्यत्स्वार्थः सुखदुःखरूपमात्रालीनः परित्यक्ता इंकारे
सत्वेयाविर्त्तीया पश्यन्ति सुखदुःखस्वरूपमस्या सुखदुःखविषयं ज्ञानमुत्पद्यते। न तत्र तदर्थरूपस्यालीनं
सत्वासत्वनिष्ठं सुखमेज्ञानानि मद्य नष्ट सुखमोज्ञानात्ज्ञानस्य विषयत्वावमापद्यते ज्ञेयत्वाप
त्तेः ज्ञातृज्ञेययोश्चापर्यायोश्चात्तं न विरोधात् अस्येव स्वीयमस्याफलमाहा। नन्वंशा तिमर्श्ववितलेद
नादर्शिष्ठादेवभ्रांताज्ञायंते। न नष्ट सुखवस्तीयमादत्स्यस्यमानाद्यु च्छितस्या विज्ञानानि जायंते। नन्व
तिनं स्वप्नीर्तिं ज्ञानं तस्याविर्भावात्सूक्ष्मादिकमर्थं पश्यति श्रावणं श्रोत्रेंद्रियजं ज्ञानं तस्मात्स्व
रूपाद्दिर्द्विवि नर्वीज्ञानानि वेदनास्पर्शनेंद्रियजं ज्ञानं विघ्नते न येतिक्लूप्तं त्रिकालाज्ञ

आलिंद्रियमुत्पाते । वर्त्तते गंधविषयं ज्ञानं त्वा । स्नेत्र

=१दर्श४×

पातं० ४२

या श्रवणेन्द्रियात् । तस्माद्दिव्यं श्रावणं विषयं ज्ञानमुत्पद्यते । आवर्त्ते इन्द्रियजं ज्ञानं । आस्मिन्नाद्दूरस्पर्शे त्वचश्चयात
रूपमात्रेणेति कृत्वा तस्य प्रकर्षाद्दिव्यं रूपज्ञानमुत्पद्यते । आस्वादो रसनेन्द्रियजं ज्ञानं । आस्वाद्यते अनेने
ति कृत्वा तस्मिन् प्रकृष्टे दिव्ये रसे संविदुत्पद्यते । वार्त्ता गंधसंवित्तिः वृत्तिशब्देन नासिकापदिष्टा वयो
घ्राणेन्द्रियज्ञानं । वार्त्ता गंधसंवित्तिः । तस्यां प्रकृष्टमाणायां दिव्यो गंधोऽनुभूयते । एतेषां फलविशेष
णां विषयसमागमाहात् ते समाधावुपसर्गा व्युत्थाने सिद्धयः । तेषां कथ्यते पादितः । फलविशेषः समा
धेः प्रकर्षे गच्छतः उपसर्गा उपद्रवा विघ्नकारिणः हर्षविस्मयादिकरणेन समाधेः शिथिलीभव
ति । व्युत्थाने तु नर्थवहारदशायां विशिष्टफलदायकत्वात् सिद्धयो भवंति । सिद्धान्तरमाह । बंधका
रणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः । व्यापकत्वादात्मचित्तयोर्नियतकर्म

४८

५०

यत्कर्मवशादेवशरीरांतर्गतयोरेवतयोर्भोक्तृभोग्यभावेनसंवेदनमुत्पद्यते।स एवशरीरबंध इत्युच्य
ते।तद्यदासमाधिवशाद्बंधकारणंधर्माधर्माख्यंकर्मशिथिलंभवति।नानेनमापद्यते।चित्तस्यचयो
सौप्रचारोहृदयप्रदेशादिंद्रियद्वारेणविषयाभिमुख्येनप्रसरस्तस्यसंवेदनंज्ञानमियंचित्तव
हानाडीअनयाचित्तंवहति।इयंरसप्राणादिवहाभ्योनाडीभ्योविलक्षणा।इतिस्वपरशरीरयोर्य
दाशरीरसंचारंजानातितदापरकीयंशरीरंमृतंजीवच्छरीरंवाचित्तसंचारद्वारेणप्रविशति
चित्तंचपरशरीरेप्रविशदिंद्रियाण्यनुवर्तंते।मधुकरराजमिवमक्षिकाः।तत४परशरीरंप्रविष्टोयो
योगीस्वशरीरवत्तेनव्यवहरति।यतोव्यापकयोश्चित्तपुरुषयोर्भोगसंकोचेकारणं।कर्मतच्चे
त्समाधिनाक्षिप्तंतदास्वातंत्र्यात्सर्वत्रैवभोगनिष्पत्तिः।३८।सिद्ध्यंतरमाह।उदानजयाज्जलपंककंट

पातं०
४४

कादिष्वसंगउक्तौ तिरश्चां मनसा नामिंद्रियाणां सुषद्वाला वद्या सुगप[illegible] हिलाद्दितिं४ साडीदनडा
द्वेन वाक्यान्ते स्मांक्रिया लेदात्मी त्यागा दिमज्ञा घ्यपदेशा४ तन्नहृदय्याम्मुखना भिकाद्वा रणावायोऽड
णयनाम्नाणे कण्ठकूपात। नाभिप्रदेशा त्यादीशुष्मपर्यंतमपनयमादपानः४ना लिप्रदेशं। निवश्य
समंतान्नयनात्समानः४ कण्ठिकादेशादाशिरोवृत्तिरुन्नयनादुदानः४ व्याप्यनयनात्सर्वशरीर
३५ व्यापीव्यानः४। [illegible]दानस्य संयमद्वारेणजयाद्धितारचां वायुनां निरोधाद्दूर्ध्वात्वे जलेमहानद्यादौ
महतिवा कर्दमे तीक्ष्णेषु कंटकेषु वा न सज्जते। अतिलघुत्वाच्च तूलपिंडवज्जलादावनियमज्ज
परित्तरत्यूर्ध्वमुत्तात्यर्थः४। सिद्धांतरमाह। समानं यावह्नलनं। अग्निमावेष्ट्य स्थवस्थितस्य समानस्य
स्य वायोर्जयात्संयमेन वशीकारान्निरावरणस्याग्नेरु[illegible]त्या तेजसा ज्वलन्निव योगी प्र

४९

४९

जर दु

तिला ति॥ सिद्ध्यंतरमाह॥ श्रोत्राकाशयोः संबंधसंयमाद्दिव्यं श्रोत्रं॥ श्रोत्रं शब्दग्राहकमाहंकारिकमि
न्द्रियं। आकाशं शब्दतन्मात्रकार्यं। तयोः संबंधो देशदेशिभावलक्षणस्तस्मिन्कृतसंयमस्य योगि
नो दिव्यं श्रोत्रं प्रवर्त्तते। युगपत्सूक्ष्मव्यवहितविप्रकृष्टशब्दग्रहणसमर्थं भवतीत्यर्थः॥ सिद्ध्यंत
रमाह॥ कायाकाशयोः संबंधसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनं॥ कायः पांचभौतिकं शरी
रं। तस्याकाशेनावकाशदायकेन यः संबंधः। तत्र संयमं विधाय लघुनि तूलादौ समापत्तिं तन्मयीभावल
क्षणां विधाय प्राप्तातिलघुभावो योगी प्रथमं यथारुचि जले संचरन् क्रमेणोर्णनाभतंतुजालेन
संचरमाणः आदित्यरश्मिभिश्च विहरन्यथेष्टमाकाशेन गच्छति॥ सिद्ध्यंतरमाह॥ बहिरकल्पिता वृ
त्तिर्महाविदेहा ततः प्रकाशावरणक्षयः॥ शरीराहंकारयोर्बहिर्मनसः शरीरनिरपेक्षो वृत्तिलाभः

ना० व५

९२

यो०

पातं
४५

हाविदेहानामभविमातशरीराहंकारदार्ढ्यहारिणोख्याता । तेनः तच्चांकृतासंयमायकाःशावर
णाक्षयः प्रत्लिकस्य चित्तस्य यः प्रकाशस्य स्यापदावरणं क्लेशकर्मादिरूपस्य क्षयः प्रविलयो भवति ।
अयमर्थः शरीराहंकारस्मतीयमनसो या बहिर्वृत्तिः सा कल्पिता तस्या अतो यदा पुनः शरीरा
हंकारत्यागं परित्यज्य स्वातंत्र्येण मनसो वृत्तिः सा कल्पिता । तत्संयमाद्योगिनः सर्वे चित्तमल
क्षीयंते । तदेवं सर्वांतविषया अपरांतविषया मध्यमत्वा स्वसिद्धीः प्रतिपाद्य अनंतरं भुवनज्ञाना
दिरूपा बाह्याः कायव्यूहादिरूपाश्चाभ्यंतरा परिकर्मनिष्पादभूता स्वभ्यो दिक्षुबलानीत्येवमा
द्याः समाधेरुपयोगिनीश्चांतःकरणबहिःकरणलक्षणोद्रियतत्वोऽवा अप्राण्या दिव्यस्त्रत्वाद्यः ।
सिद्धाश्चित्तदार्ढ्योपस्समाधेः समासोत्यन्नाय प्रतिपाद्येदानीं स्वदर्शनोपयोगिसबीजनिर्बीजस

जय ४१

माधिषिद्धये विविधोपायप्रदर्शनायाह ॥ स्थूलस्वरूपसूक्ष्मान्वयार्थवत्वसंयमाद्भूतजयः ॥ पंचानां पृथिव्याद
नां भूतानां ये पंचावस्थाविशेषरूपा धर्माः स्थूलादयस्तत्र कृतसंयमस्य भूतजयो भवति । भूतानि वश्या
नि भवंतीत्यर्थः । तथा हि भूतानां परिदृश्यमानं विशिष्टाकारवत् स्थूलं रूपं स्वरूपं च यथाक्रमं का
र्कश्यस्नेहोष्णताप्रेरणावकाशदानलक्षणं । सूक्ष्मं च यथाक्रमं भूतानां कारणत्वेन व्यवस्थितानि
गंधादितन्मात्राणि । अन्वयिनो गुणाः प्रकाशप्रवृत्तिस्थितिरूपतया सर्वत्रैवान्वयित्वेन समु[illegible]
लभ्यंते । अर्थवत्वं तेष्वेव गुणेषु भोगापवर्गसंपादनाख्या शक्तिः । तेष्वेव भूतेषु पंचस्ववस्थालक्षणे
षु । भिन्नेषु प्रत्यवस्थं संयमं कुर्वन् योगी भूतजयी भवति । तद्यथा प्रथमं स्थूले रूपे संयमं विधाय तद
नु स्वरूप इत्येवं क्रमेण । कृतसंयमस्य संकल्पानुविधायिन्यो वत्सानुसारिण्य इव गावो भूतप्रकृतयो

क्र ३

तृ १ नू २

२२ महिमा महत्त्वं × मि ४

पा॰तं॰ ४६ यो॰

लभवति। तदेवं भूतजयस्य फलमाह॥ ॥ ततोऽणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च ॥ अणिमा परमाणुरूपतापत्तिः। लघिमा तूलपिंडवल्लघुत्वप्राप्तिः। महिमा महत्त्वप्राप्तिः। प्राप्तिरंगुल्यग्रेण चंद्रादिस्पर्शनशक्तिः। प्राकाम्यमिच्छानभिघातः। शरीरांतःकरणेश्वरत्वमीशित्वं। सर्वत्र प्रभविष्णुता वशित्वं सर्वाण्येव भूतान्यनुगामित्वात्तदुक्तं नातिक्रामंति। यत्रकामावसायित्वं यत्र कामावसायो यस्मिन्विषयेऽस्य काम इच्छा भवति। तस्मिन्विषये योगिनो व्यवसायो भवति। तं विषयं स्वीकारद्वारेणाभिलाषपर्यंतं नयतीत्यर्थः। एतेऽणिमाद्याः समाध्युपयोगिनोऽष्टौ भूतजयाद्योगिनः प्रादुर्भवंति। यथा परमाणुत्वप्राप्तेर्वज्रादिकानपि प्रविशति। एवं सर्वत्र योज्यं। एतेऽणिमादयोऽष्टौ गुणा महासिद्धय इत्युच्यंते। कायसंप

५१

इत्यणिमाद्यष्टानां प्राप्नोति । तद्धर्मानभिघातश्च तस्य कायस्य ये धर्मा रूपादयस्तेषां मूर्त्यादिभिर्नाशो

न कुतश्चिदपि भवति । नाग्निरूपमग्निर्दहति । न च वायुः शोषयतीत्याद्यर्थः ॥ कायसंपद

माह ॥ रूपलावण्यबलवज्रसंहननत्वानि कायसंपत् ॥ रूपलावण्यबलानि प्रसिद्धा

नि । वज्रसंहननत्वं वज्रवत्कठिनावयवत्वं इति शरीरे तथार्थः । इति कायसंपद्विवृत

गुणसंपदः ॥ एवं भूतजयमभिधाय प्राप्तभूमिकस्येन्द्रियजयमाह ॥ ग्रहणस्वरूपास्मि

तान्वयार्थवत्त्वसंयमादिन्द्रियजयः ॥ ग्रहणमिन्द्रियाणां विषयाभिमुखी वृत्तिः । स्वरूपं

सामान्येन प्रकाशत्वं । अस्मिता अहंकारानुगमः । अन्वयार्थवत्त्वे च पूर्ववत् । एतेषामिन्द्रिया

णामवस्थापंचके पूर्ववत्संयमं कृत्वा इन्द्रियजयो भवति । तस्य फलमाह ॥ ततो मनोजवित्वं

गतिलाभ२

पात विकरणभावश्च प्रधानजयश्च। शरीरस्य मनोवदनुत्तमो गतिलाभो मनोजवित्वं कायनिरपे-
क्षाणामिन्द्रियाणां वृत्तिलाभो विकरणभावः। सर्ववशित्वं प्रधानजयः। एताः सिद्धयो जितेन्द्रि-
यस्य प्रादुर्भवन्ति ताश्चास्मिन् शास्त्रे मधुप्रतीका इत्युच्यन्ते। यथा मधुन एकदेशोऽपि स्वदते।

५७

एवं प्रत्येकमेताः सिद्धयः स्वदन्त इति मधुप्रतीकाः। इन्द्रियजयमभिधायान्तःकरणजयमाह

५२

॥ सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च। तस्मिन् शुद्धे सात्त्विके
परिणामे कृतसंयमस्य या सत्त्वपुरुषयोरन्यताख्यातिर्विवेकख्यातिर्गुणानां कर्तृत्वाभिमान
शिथिलीभावरूपा। तन्माहात्म्यात्तत्रैव स्थितस्य योगिनः सर्वभावाधिष्ठातृत्वं सम-
धिर्भवति सर्वेषां गुणपरिणामानां ... स्वामिवदाक्रमणं सर्वभावाधिष्ठातृत्वं तेषामेव शां-

र्वजा१ सर्वज्ञातृत्वं२

52

८३ ५

तोदितात्मपदेऽपधर्मत्वेन स्थितानां यथावद्विवेकज्ञानं सर्वज्ञातृत्वं । एषा चास्मिन् शास्त्रे परस्यां

वशीकारसंज्ञायां प्राप्तायां विशोका नाम सिद्धिः कथ्यते । क्रमेणास्य(?) तिकोत्तरमाह ॥ तद्वैरा

ग्यादपि दोषबीजक्षये कैवल्यं । तस्यामपि विशोकायां सिद्धौ यदा वैराग्यमुत्पद्यते योगिन

स्तदा तस्माद्दोषाणां रागादीनां यद्बीजमविद्यादयः क्लेशास्तत्क्षये निर्मूलने कैवल्यं । आत्यन्तिकी

दुःखनिवृत्तिः पुरुषस्य गुणानामधिकारपरिसमाप्तौ स्वरूपप्रतिष्ठत्वं । अस्मिन्नेव समा

धौ स्थित्युपायमाह ॥ स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात् । चत्वारो योगि

नो भवंति । तत्राभ्यासवान् प्रवृत्तमात्रज्योतिः प्रथमः । ऋतंभरप्रज्ञो द्वितीयः । भूतेन्द्रियज

यी तृतीयः । अतिक्रान्तभावनीयश्चतुर्थः । तत्र चतुर्थस्य समाधिप्राप्तस्य विषयांशांत ध्व

ऽभिप्रवृत्तस्यांतिमधुमतीसंज्ञां भूमिकां साक्षात्कुर्वतस्तस्य स्थानिनो देवा उपनिमंत्रयितारो भवंति। दिव्यस्त्रीरस
यनादिकं ढौकयंतीति। तस्मिन्नुपनिमंत्रणे नासौ संगः कर्त्तव्यः। नापि स्मयः। संगतिकरणे पुनर्विषयभोगे
निपतति। स्मयकरणे ऽहं कृतकृत्य इत्यात्मानं मन्यमानो न समाधावुत्सहते। अतः संगस्मययोस्तत्र वर्जनं। क
र्त्तव्यं। अस्यामेव फलभूतायां विवेकख्यातौ पूर्वोक्तसंयमव्यतिरिक्तमुपायांतरमाह॥ ॥क्षणतत्क्रमयो
ः संयमाद्विवेकजं ज्ञानं। क्षणः सर्वांत्यः कालावयवः यस्य कलाः प्रविभक्तुं न शक्यंते। तथावि
धानां कालक्षणानां यः क्रमः पौर्वापर्येण परिणामस्तत्र संयमात् प्रागुक्तं विवेकजं ज्ञानमुत्पद्यते।
अयमर्थः। अयं कालक्षणोऽमुष्मात्कालक्षणादुत्तरोऽयमस्मात्पूर्व इत्येवंविधे क्रमे कृतसंयमस्या
त्यंतसूक्ष्मेऽपि क्षणक्रमे यदा भवति साक्षात्कारस्तदान्यदपि सूक्ष्मं महदादि साक्षात्करोतीति। इ

तिविवेकज्ञानोत्पत्तिः। अस्यैवसंयमस्यविषयविवेकोपक्षेपायाह॥ ॥जातिलक्षणदेशैरन्य
तानवच्छेदात्तुल्ययोस्ततःप्रतिपत्तिः। पदार्थानांभेदहेतवोजातिलक्षणदेशाभवंति। क्वचिद्भेद
हेतुर्जातिः यथागौरियंमहिषीयमिति। जात्यातुल्ययोर्लक्षणंभेदहेतुः इयंकर्बुराइयमरुणे
ति। जातिलक्षणतुल्ययोर्भेदहेतुर्देशोदृष्टः यथातुल्यप्रमाणयोरामलकयोर्भिन्नदेश
स्थितयोः यत्रपुनर्भेदोऽवधारयितुंनशक्यते। यथैकदेशस्थितयोः शुक्लयोः परमाण्वोः तथा
विधविषयेभेदायकृतसंयमस्ययदाभेदेनज्ञानमुत्पद्यते। तदातदभ्यासात्सूक्ष्मेष्वपितत्वा
नांभेदेनप्रतिपत्तिर्भवति। यत्रकेनचिदुपायेनभेदोनावधारयितुंशक्यस्तत्रसंयमा
द्भवत्येवभेदप्रतिपत्तिः। तेनसूक्ष्माणांतत्वानांबुद्ध्यादीनांविवेकेनप्रतिपत्तिः॥ उक्तस्यविवेकस्यज्ञा

नष्टसंज्ञं विषयं घत्वा वैर्ब्रह्मात्रमाहा। तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञा
नं। उक्तसंयमबलादुत्पन्नायां प्रमिकायां सुत्पन्नं ज्ञानं तारयति गाधात्संसारपयोधेर्योगिनमित्या
नुर्थिकी संज्ञा तारकमित्युच्यते। अस्य विषयमाह। सर्वविषयमिति। सर्वाणि तत्त्वानि महदादी
नि विषयो यस्येति सर्वविषयं। स्वभावान्तरमाह। सर्वथा विषयत्वं। सर्वाभिरवस्थाभिः स्थूलसूक्ष्मरूप
स्मादिभेदेनातीतैश्चपरिणामैः सर्वेण प्रकारेणावस्थितानि तत्त्वानि विषयो यस्येति सर्वथाविषयं।
स्वभावान्तरमाह। अक्रमं चेति। निःशेषनानावस्थापरिणतद्रव्यावग्रहणे नास्य क्रमो ऽस्तीति वि
षयतस्त्वक्रमं। सर्वं करतलामलकवदेकक्षणोपारूढमित्यर्थः॥ तस्माच्च विवेकजात्तारकाख्यात् ज्ञानात् किं
भवतीत्याह॥ सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यं। सत्त्वपुरुषावुक्तलक्षणौ तयोः शुद्धिसाम्ये कैवल्यं।

=१ ऊयोन्नवाः व्याख्या यविवेकडा।

संज्ञां कृत्वा संयम २

साम्यं सत्वस्य सर्वथा कर्तृत्वाभिमाननिवृत्त्या स्वकारणेऽनुप्रवेशः शुद्धिः। पुरुषस्य शुद्धिरुपचरितभोगा
भावश्च॥ इति द्वयोः समानायां शुद्धौ पुरुषस्य कैवल्यमुत्पद्यते मोक्षो भवतीत्यर्थः॥ तदेवमंतरंगं योगां
गत्रयमभिधाय तस्य च संयमसंज्ञां च विषयप्रदर्शनार्थं परिणामत्रयं उपपाद्य संयमबलोत्पद्यमाना॥
पूर्वांतापरांतमध्यभवाः सिद्धीः प्रदर्श्य समाध्याश्वासोत्पत्तये बाह्या भुवनज्ञानादिरूपा आभ्यंतरीश्च
कायव्यूहज्ञानादिरूपाः प्रदर्श्य समाध्युपयोगायेंद्रियप्राणजयादिपूर्विकाः संदर्श्य परमपुरुषार्थ
सिद्धये यथाक्रममवस्थासहितं तत्तज्जयेंद्रियं सत्वज्ञानोत्पत्तिरीत्या उपायात् उपन्यस्य तारकस्य
सर्वसमाध्यवस्थापर्यन्तभवस्य स्वरूपमभिधाय तत्समापन्नस्य कृताधिकारस्य चित्तसत्वस्य स्वकार
णेऽनुप्रवेशात्कैवल्यमुत्पद्यत इत्यभिहितं निर्णीतं॥ इति विभूतिपादस्तृतीयः॥३॥ इति श्रीमहाराजाधिरा

४ श्री
भूरु ५

नू२

पातं० ॥ श्रीभोजदेवविरचितायां राजमार्त्तण्डाभिधानायां पातञ्जलयोगशास्त्रसूत्रवृत्तौ विभूतिपादस्तृतीयः ॥ द्वाय

५०

दात्मन्येव कैवल्यं विनोपायैः प्रजायते । तमेकमजमीशानं चिदानंदमयं स्तुमः ॥१॥ इदानीं विप्रतिपत्ति

समुत्थभ्रांतिनिराकरणेन युक्त्या कैवल्यस्वरूपव्यवस्थापनाय कैवल्यपादोऽयमारभ्यते । तत्र याः पूर्व

55

मुक्ताः सिद्धयस्तासां नानाविधजन्मादिकारणप्रतिपादनद्वारेणैवं बोधयति या एताः सिद्धयः सा

५०

ः सर्वाः पूर्वजन्माभ्यस्तसमाधिबला जन्मादिनिमित्तमात्रत्वमाश्रित्य प्रवर्त्तंते । ततश्चानेकसाधनसाध्यसमाधे

५५

र्नन्वतिरस्कारात्तस्याप्रोत्साहनाय समाधिसिद्धेश्च प्राधान्यख्यापनार्थं कैवल्यार्थोपयोगार्थं चाह ॥

जन्मौषधिमंत्रतपःसमाधिजाः सिद्धयः ॥१॥ काश्चन जन्मनिमित्ता एव सिद्धयः । यथा पक्ष्यादीनामाका

शगमनादयः । यथा वा कपिलमहर्षिप्रभृतीनां जन्मसमनंतरमेव प्रजायमाना ज्ञानादयः सांसि

सिद्धिकारणाः॥ ओंषधिसिद्धिर्यथा। पारदादिरसायनाद्युपयोगात्। मंत्रसिद्धिर्यथा मंत्रजपात्केषांचि
दाकाशगमनादि। तपःसिद्धिर्यथा विश्वामित्रादीनां। समाधिसिद्धिर्यथा प्राक्प्रतिपादिता। एताश्च सिद्धि
यः पूर्वजन्मनि क्लिष्टचित्तक्लेशानामेवोपजायंते। तस्मात्समाधिसिद्धिर्विनायासां सिद्धीनां समाधिरे
व जन्मांतराभ्यस्तः कारणं मंत्रादीनि तु निमित्तमात्राणि नंदीश्वरादीनां जात्यादिपरिणामो सिद्धे

५ जन्म

वं निवर्त्तते। तत्कथं जन्मांतराभ्यस्तस्य समाधेः कारणत्वमभ्युपगतं स्यादित्याशंक्याह। सिद्धिश्चोत्कर्षविजो
यः कायकरणाश्च जात्यंतरपरिणामः प्रकृत्यापूरात्। योऽयमिहैव जन्मनि नंदीश्वरादीनां जात्यादि
परिणामः॥ स प्रकृत्यापूरात्। प्रकृतयो एव हि प्रकृतयोः स्वविजन्मनि विकारानापूरयंति जात्यंतरा
द्विज्ञाकारेण परिणमयंति। ननु धर्माधर्मादयस्तत्र क्रियमाणा उपलभ्यंते। तत्कथं प्रकृतीनामापूरणे

पा० सं०
५१

56

जे ८५

कारणत्वमित्याह। निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्॥ निमित्तं धर्मादि तत्प्रकृती
नामर्थान्तरपरिणामेन प्रयोजकं। नहि कार्येण कारणं प्रवर्त्यते। कुत्र तर्हि तस्य धर्मादेर्व्यापार इत्याह।
वरणभेदस्तु ततस्तस्मादनुष्ठीयमानात् धर्मादेर्वरणमावरकं कर्मधर्मादि तस्यैव विरोधित्वाद्भेदः
क्रियते। तस्मिन्प्रतिबंधके क्षीणे प्रकृतयः स्वयमभिमतकार्याय प्रभवंति। दृष्टांतमाह। क्षेत्रिकवत्। यथा
क्षेत्रिकः कृषीवलः। केदारात्केदारांतरं जलं निनीषुर्जलप्रतिबंधकावरणमात्रं करोति। तस्मिन्भिन्ने
जलं स्वयमेव प्रसरद्रूपं परिणामं गृह्णाति। न तु जलप्रसरणे तस्य कश्चित्प्रयत्नः। एवं धर्मादेर्बोद्ध
व्यं। यदा साक्षात्कृततत्त्वस्य योगिनो युगपत्कर्मफलोपभोगाय आत्मीयनिरतिशयविभूत्यनुभ
वात् युगपदनेकशरीराणि निर्मित्सोपजायते। तदा कुतस्तानि चित्तानि प्रभवंतीत्याह॥ निर्माणचित्ता

५१
५६

कायेषु

न्यस्मितामात्रात् । योगिनस्स्वयंनिर्मितस्वधानि चित्तानि मूलकारणादस्मितामात्रादेव तदिच्छयाप्र
सरंति । अग्नेर्विस्फुलिंगा इव । युगपत्परिणमंतानन्तु बहूनां चित्तानां भिन्नाभिप्रायत्वान्नैककार्यक
र्तृत्वं स्यादित्याह । प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषां । तेषां प्रवृत्तिभेदे व्यापाररनानात्वे एकं
योगिचित्तं प्रयोजकं प्रेरकमधिष्ठातृत्वेन निर्मितमतत्व । अयमर्थः । यथात्मीये शरीरे मनश्चक्षु
४ पाण्यादीनि यथेष्टं प्रेरयत्यधिष्ठातृत्वेन तथा कायांतराण्यपीति । जन्मादिप्रभवत्वात्सिद्धी
नां चित्तमपि पंचविधं । तज्जन्मादिप्रभवाच्चित्तात्समाधिप्रभवस्य वैलक्षण्यमाह । तत्रध्या
नजमनाशयं । ध्यानजं समाधिजं यच्चित्तं तत्पंचसु मध्ये अनाशयं कर्मवासनारहितमित्यर्थः ।
यथेश्वरचित्तेभ्योऽपि योगिनां चित्तं क्लेशादिरहितं विलक्षणं । तथा कर्मापि विलक्षणमित्याह ।

विधमेव २

पातं.
५२

म०॥ कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषां ॥ योगिनां फलसंन्यासात्कर्म योगादि शुक्लाकृष्णं । अशुक्लफलदं ब्रह्मार्प-
त्वादिकृष्णं । इतरेषां त्रिविधं । तत्र शुक्लं कर्म विलक्षणानां दानतपःस्वाध्यायादिमतां पु-
रुषाणां । कृष्णं कर्म नारकाणां । शुक्लकृष्णं मनुष्याणां । योगिनां तु संन्यासवत्त्वेनाविधेयकर्मविलक्ष-
णानां यत्फलत्यागात्संधानेनैवात्मज्ञानान्न किंचित्फलमारभते । अथैव कर्मणोऽफलमा-
हा ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानां । इह हि कर्मवासना द्वि- विधा । स्मृति-
मात्रफला जात्यायुर्भोगफलाश्च । तत्र जात्यायुर्भोगफला अनेकैकजन्मनि वा । इत्यनेन सर्वमे-
वक्तं निर्णयात् । पाकस्मृतिमात्रफलास्तु ततः कर्मणोऽपेतकर्मणा या हि यत्र शरीरमास्थाय दे-
वमानुषतिर्यगादिदेहेन तस्य विपाकस्तथा । अनुगुणा भवन्ति पापवासनास्तासामेव तस्मादभिव्य-

५२
५१

थक्तिर्वासनानांभवंति॥ अयमर्थः॥ येनकर्मणा पूर्वंदेवतादिशरीरमारब्धंजात्यंतरशतव्यवधाने
पुनस्तथाविधस्यैव शरीरस्यारंभे तदनुरूपा एवस्मृतिफला वासनाः प्रकटीभवंति। लोकोत्तरे
ष्वेवार्थेषु तस्य स्मृत्यादयो जायंते। इतरास्तु सत्योपिव्यक्तास्तिष्ठंति। न तस्यां दशायां नारकादि
शरीरोपभोगयोग्या वासना व्यक्तिमायांति। आसामेव वासनानां कार्यकारणभावानुपपत्तिमाशंक्य स
मर्थयितुमाह॥ जातिदेशकालव्यवहितानामप्यानंतर्यं स्मृतिसंस्कारयोरेकरूपत्वात्॥ इहनाना
योनिषु भ्रमतां संसारिणां कांचिद्योनिमनुभूय यदा योन्यंतरसहस्रव्यवधानेन पुनस्तामेव योनिं
प्रतिपद्यते। तदा तस्यां पूर्वानुभूतायां योनौ तथाविधशरीरादिव्यंजकापेक्षया वासनाः प्रक
टीभूता आसन्न। तास्तथाविधव्यंजकाभावात्तिरोभूताः पुनस्तथाविधव्यंजकशरीरादिलाल

नाम ४

पो० प्र
५२
58

प्रकटीभवंति जातिदेशकालव्यवधाने पि तासां स्वानुरूपस्मृत्यादिफलसाधने आनंतर्यं ते ईत
र्यामता उक्तः स्मृतिसंस्कारयोरेकरूपत्वात् तथा हि। अनुभूयमाना कर्मणः स्विन्नमपले वास
नानां रूपः संस्कारः समुत्पद्यते। स च स्वर्गनरकादीनां फलानां यानंतरीभावः कर्मणां व्यापा
दीनां शक्तिरूपतयावस्थानं। कर्तुस्तथाविधभोगभोक्तृत्वरूपं सामर्थ्यं संस्कारः स्मृतिः स्मृतस्त
स्य वेदुःखोपलोगप्रत्ययस्य लवाश्रुतु नरपि संस्कारस्मृत्यादयः। एवं द्वयस्य स्मृतिसंस्कारादयो
भिन्नातस्यानंतर्यासावेदुर्लभः कार्यकारणभावः। अस्माकं तु यदानुभव एव संस्कारो भवति
संस्कारश्च स्मृतिरूपतया परिणमति। तदा एकस्यैव चित्तस्यानुसंधातृत्वेन स्थितत्वात् कार्यका
रणभावो दुर्घटः नवत्वा नंत कार्यकारणभावस्वभासनाना। यदा ह प्रथममेवानुभवः प्रवर्तते।

कार्य१

५२
५८

तदा किं वासनानां निमित्तं उत्कर्षे निमित्तं इत्याशंक्यापनेतुमाह। तासामनादित्वमाशिषो नित्यत्वात्। तासां वा
सनानामनादित्वं न विद्यते। आदिर्यस्य तस्य भावस्तत्त्वं। आसामादिर्नास्तीत्यर्थः। कुत इत्याह।
आशिषो नित्यत्वात्। येयमाशीर्महामोहरूपा सदैव सुखसाधनानि मे भूयासुः। मा कदाचित्तै
र्मे वियोगो भूयादिति यः संस्कारादीनां कार्याणां संप्रवृत्तिः। संकल्पविशेषः वासनानां
कारणं तस्य नित्यत्वादनादित्वमित्यर्थः। एतदुक्तं भवति। कारणस्य सन्निहितत्वादनुभवसं
स्कारादीनां कार्याणां प्रवृत्तिः केन वार्यते। अनुभवसंस्काराद्यनुविद्धं संकोचविकाशधर्मि
चित्तं तदभिव्यंजकविपाकलाभात्तत्तत्फलरूपतया परिणमत इत्यर्थः। आसामानन्त्ये सत्युच्छेदः क
थं संभवतीत्याशंक्य हानोपायमाह। हेतुफलाश्रयालंबनैः संगृहीतत्वा × देषामभावे तद

पातं
५४

स्मनै २

नावी॥वासनानामनंतराउक्तोहेतुस्सुखाद्युसवदुःखरागाद्यस्तेषामविद्या।इतिसाक्षात्पारंप
र्येणायहेतुश्चफलं शरीरादिर्हो स्मृत्यादिश्च।आश्रयोबुद्धिसत्वं।आलंबनंयदेवानुवस्थतदे
ववासनानामतस्तैर्हेतुफलाश्रयालंबनैःतासामपिवासनानांसंगृहीतत्वात्तेषांहेत्वादीनामभावे
ज्ञानयोगाभ्यांदग्धबीजकल्पत्वेविहितनिर्मूलत्वात्तद्वासनाःप्ररोहंनपर्यांति।केनकार्यमारभंतइ
तिनासामभावः।ननुप्रतिक्षणंविनश्वरत्वात्पदार्थानांवासनानांतत्फलानांचकार्यकारणभा
वेनायुगपद्भावित्वात्कथमेकत्वमित्याशंक्यएकत्वसमर्थनायाह।अतीतानागतंस्वरूपतो
ऽस्त्यध्वभेदाद्धर्माणां॥यद्यपिमतांतरवादिनामसत्यनिर्मुक्तिमतीतेषांसत्वसंबंधायोगात्तद्वाहिशास्त्रविषा
णानांचविद्यपिसत्वमनंगीकृत्यनिरुपार्थैःस्वकार्येकिंचिदपिकारणानिवर्तेरन्ननहिविषय

स्वा १

५४
५८
॥३

मनालोच्य कश्चित्स्वयं वर्णते । समनापि विविताधाम्नां नानावसंबंधोऽद्दष्टः ॥ निरूपार्थेन कार्येण किमुद्दिश्य प्रकार
णो ऽक्रिरस्थित्यनवस्थास्य पालनाद्यसमाज्ञा केन तत्कथं निरूपाख्यतामनावरूपतां न ऊतां न विप्तदुष्टरूपं स्वीक
रोतीत्यर्थः ॥ तस्मात्समनानाज्ञासमन्वावृत्तसमतां च्योतन्त्यय संन्यवान्नैस्थैर्विपरिणामसमाणो धर्मी स्वे विकरूप
नयेनावतिष्ठते । धर्मास्त्वेते यद्विकल्पेन थवस्थिताः स्वस्मिन्स्वस्मिन्नध्व निश्चिताः न स्वं रूपं त्यजंति । नन्नेमा
ने रथ्व निष्टवस्थिताः केवलं नो यतां न संति । तस्माद्धर्माणामेवानागतानागतावधभेदः ॥ तेनैव च रूप
ण कार्यकारणतानोऽस्मिन्दर्शने प्रतिपाद्यते । तस्मादपूर्वेर्गपर्यंतमेकमेव चित्तं धर्मितया तु वर्तमानं न निस्क्षे
तुं पार्यते । न एते धर्मधर्मिणः किंस्वरूपा इत्याह । तेष्वन्नात्तन्नर्मोत्तुणात्मानः सर्वे एते धर्मधर्मिणः प्रोक्ताः प्रेयक
सूक्ष्मा वेदेनये स्थिताः । गुणाः सत्वरजस्तमोरूपा भवदा त्मान स्वच्छभाव रूपास्तत्वशिणा मनस्वपाइत्प

पातं॰
५५

र्थः। यतः सत्त्वरजस्तमोभिः सुखदुःखमोहरूपैः सर्वसांचाव्यांतरलेद लिङ्गानां लावद्यश्री नामन्वये
नुगमो दृश्यते। यद्यप्येवं तथापि तत्तत्परिणामरूपं हेतुः। यथा सुखादयो दृश्यन्ते तत्परिणामरूपाः। य
द्येतत्त्रयो गुणाः सर्वत्र मूलकारणं। कथमेकोऽस्मीति प्रत्ययः [illegible] परिणामैकत्वाद्व
स्तुतत्त्वं। यद्यपि त्रयो गुणास्तथापि तेषामंगांगिभावगमनपरिणामलक्षणोऽयं परिणामैकत्वाद्व
स्तुत्वमंगिकविदुर्गो [illegible] वं रूपसंस्थे कालादृक्ष नश्वत्वमेकत्वमुच्यते। यथा इयं पृथिवी
यं वा [illegible] विरोधि [illegible] ज्ञान [illegible] स्त्यर्थे वस्त्वेकमनेकं वा वस्तु उत्पद्यते। यद्वा विज्ञानमेवोद
मनावत्रात्कारण [illegible] नास्ति [illegible] तथा प्रतिनास्ति। तद्वा कथमेतदुच्यते। वस्तुसाम्ये
हा [illegible] चित्तभेदात्तयो [illegible] तयोर्ज्ञानार्थयोर्विभक्तः पन्था विविक्तो मार्ग इति यो

५५

६०

वत। कथं वस्कसाध्ये चित्रभेदा लभमाने वस्कनि स्त्र्यादौ तुपलभ्यमानो नानाप्रमाणानां चित्रस्य भेदः सु
खदुःखयोः हृद्यपनयाप समुपलभ्यते। तथाह्येकस्यां रूपलावण्यवत्यां योषिति उपलभ्यमानायां सरागा
श्रमुखसुखत्यघ्नेन। [illegible]द्याघ्नः द्वेषः। परिव्राजकादेर्हेलैवेण त्येव कस्मिंश्चिदपि वस्कनि नानाविधचित्तोद
याः कथं चित्रत्वकार्यत्वं वस्कनः एकचित्रकार्यत्वेन हेतुः कस्यपतयिवाचतासेऽत। किंच चित्रकार्यत्वेव
स्कनो यदीयस्य चित्रस्य तद्वस्कस्कार्यं तस्मिन्नर्थो न तथ्या सत्के चित्रे तद्वस्कन किंचित्स्यात्। नचलिति
चेत्। नातद्देवक थमनो बुद्धिनिरुपलब्धेत। उपलब्धे ते वस्तमात्र चित्रकार्यमथ युगपद्बुद्धिं
सोर्थः किंपतेल्ला बुद्धेर्निमित्तस्यात्तस्यार्थस्यैकनिर्मितात्बुद्धे लद्गप्यंस्या त्रोएतदुक्तं भवति। सम पि
त्रिचकारणेयह्विकार्यस्यानते चास्यदासमर्थं नरा ज्ञानाविधकारणाज्यमेकस्यपस्यात्। कारणभे

पातं० ५६

ज्ञानत्वमसत्वात्तस्मै नोपाख्यानमर्थो निर्हेतुकीवाख्यातः प्रयेवं कथं तत्तनात्रिगुणात्मनार्थेन एकस्यैव
प्रमाणत्रयस्य सुखदुःखमोहमयानि ज्ञानानि निमित्तं श्रतां मैत्रैवं यथार्थत्रिगुणस्यापि ज्ञानमपि त्रिगु
णं तच्छायावार्थप्रतिभासो न्यत्रैव धर्माधर्मादयश्च सहकारिणां कारणं । तद्वृद्वा लिलक्षणं ज्ञैत स्य
तेन तेन रूपेण परिणामंत्यन्तः । तथा सुकास्तु कथं पंचविहितायां योगविधिधर्मसहकृतं चित्तं मैत्र्यां
गितया परिणमामानेष्टुखंरूपं भवति । तदेवाधर्मसहकारिजन्मो गितया दुःखरूपमपत्नीमात्र
च्छत्नं भवति । तदाधर्मसहकारितया तमसो गित्वे न कोपनायाश्च सपत्न्या मोहमयं भवति । त
स्मात् हि ज्ञानमन्यतिरिक्तो । प्रिया द्योर्थः । तदेवं नविज्ञानभिन्नस्याप्रादात्स्र्यपि विरोधान्नकार्यका
रणाभावश्च कारणा [illegible] प्रसंगादिति ज्ञानातिरिक्तत्वमर्थस्य व्यवस्था

५८

61

वसाध्य। विशिष्टोऽयं हेतुः इत्ययमेवाचित्तस्यासिद्धौ। किं वस्य बुद्धिसंवेदनद्वारेण पुरुषाणां हिताहितप्राप्तिपरिहार
रूपाः प्रवृत्तयो दृश्यन्ते। तथाहि कुड्योऽहं नीलोऽहं मन्त्रमेरागइत्येवमाद्यासंवित् बुद्धस्संवेदनेनोपपन्नेत्याशयोऽकामपने
त्रमाहा। एकसमये चोजयान्यवधारणां मर्थस्य संविन्निरिदितया व्यवहारयोग्यतापादनं। अयमर्थः सुखदुःखादुःख
स्य१ हेतुर्वर्तिप

रक्षं हि न वर्तते तथाविधस्य हेतुः स्यमेदेन विद्याया संक्रान्तिमज्ञावस्थ्यां सत्यां सिद्धं सदाशात्तत्वमि
तिनकाचित्परिणामित्वाशंका। नन्व चित्तमेवम लोत्कर्षायदि प्रकाशकं प्रकाशस्वरूपत्वाद् स्वपरप्रकाश
त्मानमर्थं च प्रकाशयतीति तावतैव व्यवहारपरिसमाप्तिः किंयद्धात्रं तरणेत्याग्रं कामपनेत्व शार
माहान तत्स्वात्मसंहरूपत्वात्तन्नुचित्तं घाभासं च प्रकाशनिस्सवति उत्तपवेद्यं भवतीत्याचतांक्र
न्तं हरूपत्वात्तायक्लिलहरूपं तं द्रष्टुर्विघांपथाद्वटादिवेद्यं च चित्तं तस्मात्तत्स्वाभासं तन्नुबुद्धेस्व
संविदहमित्येवमाकारेण सुखदुःखरूपतया व्यवहारक्रमतापादानमेवंविधं योपारद्ध
यमर्थप्रसञ्जनाकालेन युगपत्कर्तृकं ग्राह्यं विरोधान्नानहि विरुद्धयोऽर्थापारयोर्युगपत्संभवा
स्थितिरत एकस्मिन्काले ग्रलयेऽस्वार्थस्यावधारपित मज्ञाकृत्वान्न चित्तं प्रकाशंत्ति स्फुटत्व
स्यस्वरूप१ क१

प्रा॰नं॰
५९

62

भवति। किं चैवंविधव्यापारद्वयनिष्पाद्यस्य फलद्वयस्यासंवेदनाद्बहिर्मुखत्वेनार्थेनिश्चलेन चि
त्तस्य संवेदनार्थेति व्यापारफलं न स्यादिति स्मितिमित्यर्थः। ननु मास्तु स्मृतिकाले स्वयं दृष्टान्तरेणैवा
विश्यतीत्याशंक्याह। एककमर्थेवोल्लयान् मवस्माधारणं सूत्रमेतत्। विज्ञान्तरहृष्टेष्वदृष्टिबुद्धेरति
प्रसंगः स्मृतिमंकरस्यापदि हि बुद्ध्या बुद्ध्यन्तरेण विद्येत तदा सा पि बुद्धिः स्वयमबुद्धा बुद्ध्यन्त
रं प्रकाशयितुमसमर्थेति स्वयं हि कैवबुद्ध्यन्तरं कल्पनीयं। तस्याप्यन्यद्बुद्धिरित्यनवस्थानाद्बुद्धिशाखस्यं
येणो विश्वर्थसतानिर्नष्टो वा। नहि प्रतीतावप्रतीतायामर्थः प्रतीतो भवति। स्मृतिसंकरस्य
प्रसंगोऽपि। व्यापरमेवानुभवात्मानापेक्षबुद्धीनाद्धारिकाणामनन्तानां बुद्धीनामुत्पत्तेर्बुद्धिबुद्धिज
नितसंस्काराद्बुद्धिविषयं स्मृतियं तत्तदा स्वर्थबुद्धेरपरपर्यवसाना त्वबुद्धिस्मृती

३२

त॰४
५९

६२

न विद्यते प्रतिसं क्रमः ५

नां च बहूनां युगपदुत्पत्तेः किस्मिन्नर्थे स्मृतिरियमुत्पन्नेति ज्ञातुमशक्यत्वात्स्मृतीनां संकरः
स्यात्ततस्त्रिरूपस्मृतिरियं रसस्मृतिरिति न ज्ञायते। न च बुद्धेः स्वप्रकाशत्वाभावे बुद्ध्यंतरेण वा
संवेदने कथमयं विषयसंवेदनरूपो व्यवहारः इत्याशंक्य सिद्धांतमाह। चितेरप्रतिसंक्र
मायास्तदाकारापत्तौ स्वबुद्धिसंवेदनं। पुरुषश्चिद्रूपत्वाच्चितिः सा अप्रतिसंक्रमा ऽन्यत्रग
मनं यस्याः सा तथोक्ता अन्येनासंकीर्णेति यावत्। यथा गुणा अंगांगिभावलक्ष
णे परिणामे ऽंगिनं गुणं संक्रामंति तद्रूपतामिवापद्यंते यथा वा लोके परमाणवः प्रसरंतो
विषयमुपरंजयंति नैवं चितिशक्तिः तस्याः सर्वदैकरूपतया प्रतिष्ठितत्वेन व्य
वस्थितत्वात् अतस्तत्सान्निध्ये यदा बुद्धिस्तदाकारतामापद्यते चेतनेवोपजायते बुद्धिवृ

र्थ:।१२ ॐ स्वसंविदितं चित्तं सर्वार्थग्रहणसामर्थ्येन सकलव्यवहारनिर्वाहक्षमं भवती २

पातं
६०
63

न्निप्रतिसंक्रांतायाश्चिदवस्थाविशिष्टतया मंतव्यात। तदा बुद्धेः स्वस्यात्मनो वेदनं भ
वतीत्यर्थः॥ द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थं॥ द्रष्टा पुरुषस्तेनोपरक्तं तत्सन्निधानेन तद्रूपता
मिवापन्नं॥ विषयोपरक्तं गृहीतविषयाकारपरिणामं यदा भवति तदा तदेव सर्वार्थग्रह
णसमर्थं जायते। यथा निर्मलस्फटिकदर्पणादि प्रतिबिंबग्रहणसमर्थमेवं रजस्तमोभ्या
मनभिभूतं सत्वं शुद्धत्वाच्चिच्छायाग्रहणसमर्थं न पुनरशुद्धं रजस्तमसा। तदा न्यग्भू
तरजस्तमोरूपमंगितया सत्वं निश्चलप्रदीपशिखाकारं सदैवैकरूपतया परिणममानं
चिच्छायाग्रहणसामर्थ्यादामोक्षप्राप्तेरवतिष्ठते। यथायस्कांतसन्निधाने लोहस्य च
लनमाविर्भवत्येवं चिद्रूपपुरुषसन्निधाने सत्वस्याभिव्यंग्यमभिव्यज्यते। अत एव॥

६०
६३

दुःखस्पर्शीतोगमनुनवति । स एव संयोगोत्यन्तप्रशीतनिषेधेन विवेकाग्रहणादनेकुरपि पुरुषस्य भोग इति ८

२ते

अतएवास्मिन्दर्शने द्विविधश्चक्तिर्नित्योदिता अभिव्यंग्या च । नित्योदिता चित्शक्तिः पुरुषस्तत्सन्नि
धानादभिव्यक्तमभिव्यंग्यं चैतन्यं सत्त्वमभिव्यंग्यचित्शक्तिः । तदत्यन्तं सन्निहितत्वादन्तरंगं पुरुषस्य
भोग्यतां प्रतिपद्यते । तदेव शान्तब्रह्मवादिभिः सांख्यैः पुरुषस्य परमात्मनः अधिष्ठेयं क
र्मात्मरूपं सुखदुःखभोक्तृतया व्यपदिश्यते । तं यदत्यन्तानुद्रिक्तत्वादेकस्यापि चित्तस्य कदा
विकस्य विदग्ध्वा त्रिगुणं प्रतिक्षणं विपरिणममानं सुखदुःखमोहात्मकमनिर्मलं तत्र
स्मिन्कर्मात्मरूपे शुद्धे सत्त्वे स्वाकारसमर्पणद्वारेण संवेद्यतामासादयति । तत्र समग्रं वि
तसत्त्वमेकत्वः प्रतिसंक्रान्तविच्छायमयतोऽदृष्टात विषयाकारेण विज्ञेनोपढौकितस्याका
रं चित्संक्रान्तिबलाद्यत्वेतनीयमानी वा स्वकैतस्यानावेपि दुःखवैद्यपदिश्यते । अनेनैवात्ति

चमेवपुरुषस्य

पातं ६२

मायेण विध्वंवासितोन्नमलत्व...प्रतत्वामवमिति। अथत्रापि प्रतिबिंबे प्रतिबिंब्यमानस्वाघोत्
ह्रशाद्यायांन रोह्न चश प्रतिबिंबग्राहेनोक्त्या एवं सत्वेपि प्रोक्तमेय विरुद्धा मह्रश्च स्वकीयवि
ह्वायांत मरांसरालिष्य किं प्रतिबिंबग्राहार्थ। मत्र प्रतिबिंबं नाम निर्मलस्य निय नपाति मा
त्रस्य निर्मले हर्ष्टं यथा मुखस्य दर्पणे। अत्यंत निर्मलस्य यथा प कस्य वस्तुन स्य नस्मात्निर्म
ले मत्वेकथं प्रतिबिंबत्वेन स्वपपघलात्। उच्यते। प्रतिबिंबनस्य स्वरूपमनवगत्वानाम चातदम
स्यधाधि यैवमलत्वातामा प्रतिघ्यं याया। स्विद्धकोऽपुकप ध्यपांनि धेय नियकिं। सैव प्रतिबि
बनस्य... हशी... चिद... तन्त्रापा विलंबनीति यदप्रस्तम त्यंतनि
र्मलस्य... कथमनिर्मलेमले ... तितत्वदप्पानिकांतिकं। नैर्मल्याद्दपरूपेपि

६२

६४

पातं
६२

65

यावमायः। एवं चेदस्य वमार्गे कथं जडत्वं। अत्रोच्यते। अत्र लोमप्रतिलोमलक्षणपरिणामद्वयमह
जं शक्तिद्वयमस्ति। तदेव पुरुषार्थकर्तव्यता। स्यात्। मायाविमनाया। १ विसृष्टातः सहजेन। तत्र मह
दादिमहाभूतपर्यन्तस्थानाहि [illegible] तयोर्लोमः परिणामः। तेन स्वकारणानुप्रवेशद्वार
णा। स्मितान्तः प्रतिलोमः परिणामः। इत्थं च पुरुषस्य पर्यवसितो यः परिसमाप्तः सहजशक्तिद्वय
स्वयाकृतार्था प्रकृतिः नपुनः परिणाममारभते। एवंविधायाश्च पुरुषार्थकर्तव्यतायां जड
या। १ विसृष्टात [illegible] विवक्षु [illegible] नस्वयदीक्षा शक्तिं सहजेन प्रधानस्य स्थिता तत्किमर्थं तत्
दर्थि निर्मोक्षाय यत्नः क्रियते। मोक्षस्यानर्थनीयत्वेन तु पदेशा [illegible] शास्त्रप्राप्त्यानर्थकी त
स्यात। योयं प्रकृति [illegible] योरनादि [illegible] मोक्षभावलक्षणः १ संबंधः [illegible] ति [illegible] चेतनायाः

६२

६५

गप

६जि२

प्रकृतेः कर्तृत्वाभिमानाद् दुःखानुभवमतिकथ्य मियं दुःखनिवृत्तिरात्यन्तिकी मम स्यादिति निर्वक्तेना
र्थ्येन भाषः। अतो दुःखनिवृत्त्युपायोपदेश्यकशास्त्रोपदेशापेक्षास्त्येव। प्रधानस्यातथाभूतमेव
वकर्मात्मरूपं बुद्धिसत्त्वं शास्त्रोपदेशस्य विषयः। दर्शनान्तरेष्वेवं ह्येवं विषय एवं विधाध्यमाव:
शास्त्रे विधिक्रियते। सत्त्वमोक्षाय प्रयतमानः तदेवं विधमेव शास्त्रोपदेशं सहकारिणमपेक्ष्य मोक्षा
ख्यं फलमासादयति। यद्यप्येकत्र कार्यो प्रार्थिस्यां सकेशायांसामग्र्यामात्मातन्त्रे मता। अस्य
वप्रतिलोमपरिणामद्वारेणोत्पाद्यस्य मोक्षाख्यस्य कार्यस्येदृशे पक्षसामग्र्या प्रमाणेन निश्चिता।
प्रकारान्तरेण तु दुःखपपत्तेरर्थतत्त्वं विना कथं न वित्तुमर्हति। अतः [illegible] तमेतत्संक्रीत विषयोप[illegible]सि
द्धक विद्यार्थं बुद्धिसत्त्वं विषयनिश्चयद्वारेण समयं लोकयात्रां निर्वाहयतीति। एवं विधमेवा

सूत्र २ चाता... संहत्यार्थक्रियाकारि ४

पा त॰ ६२

त्वं पश्यन्तो ध्यान्त्याश्च समं त्वदन्तं चित्रं चित्रमार्गं च जगत् इत्येवं कृत्वा ण्णः ४ प्राप्ति बाधिता सर्वे ते ननु य
द्येवं विधा देवादिविन्यास सकलस्य व्यवहारस्य निष्पत्तिः कथं प्रमाणस्य श्रयो दृष्टो स्फ [illegible] तत्स्वरूपं कथं इत्यु
क्त प्रमाणमाह । तदसंख्येयवासनानिर्मितम् अपि परार्थं प्रत्यक्षादिभिर्न भोक्तृभोग्यापवर्गलक्षणम् अर्थं
साधयतीति । अत्र शरीरादिसंहतकारित्वात् संहत्यकारित्वम् इत्यर्थक्रियाकारित्वं परार्थं दृष्टं यथा ६३
शयनासनादि । सत्वरजस्तमांसि च [illegible] परिणामत्वं [illegible] संहत्यकारीणि अतः परार्थानि य
त्परः स पुरुषः । ननु यथा दृष्टान्ते शयनासनादीनां परेण शरीरवतापि परार्थत्वमुपलब्धं तद्दृष्टान्ते न ६६
तादृश एव परः सिद्ध्यतीति । यावद्दृष्टान्तवत्तां प्रतिपाद्य हेतु [illegible] परस्मादिसिद्धिः परस्मात् सिद्धे [illegible] ५२
विघात [illegible] यद्यपि च मात्राचेन परार्थमात्रं स्वेच्छया [illegible] तथाऽपि [illegible] त्वेन ।

66

विलक्षणधर्मिपर्यालोचनया तद्विलक्षण एव लोकापरः सिद्ध इति यथा चंदनवनाद्धूते शिखरिणि विलक्ष
णाद्धूमाद्वह्निरनुमीयमानश्चेतरवह्निविलक्षणश्चांदन एव प्रतीयते । एवमिहापि विलक्षणाद्धर्मत्वाख्य
धर्मात्तस्य परार्थत्वेऽनुमीयमाने तथाविध एव लोकाधिष्ठाता परशिवमात्ररूपः स्वीयतः सिद्ध
तीयदि वा तस्य परत्वं सर्वोत्कृष्टत्वमेव प्रतीयते । तथाहि तामसेभ्यो विषयेभ्यः प्रकृष्टान्तःशरीरं
प्रकाशरूपेन्द्रियाश्रयत्वात् । तस्मादपि प्रकृष्टं तेऽभ्य इन्द्रियाणि ततोऽपि प्रकृष्टं सत्त्वं प्रकाशरूपं तस्या
पि यः प्रकाशकोऽसौ प्रकाश्यविलक्षणः सचिद्रूप एव भवतीति । कृतस्तस्य संहतत्वं । इदानीं शास्त्र
फलं कैवल्यं निर्णेतुं दृष्टान्तिं सूत्रे रूपक्रमते । विशेषदर्शिन आत्मभावनाविनिवृत्तिः । एवंमत्व
पुरुषयोरत्यन्तवैलक्षण्ये साधिते यस्तयोर्विशेषं पश्यति । अयमस्मादन्य इत्येवं रूपं तस्य विज्ञाततत्त्वस्य रूपस्या वि

कैवल्यप्राग्भारं चित्तं यदस्याज्ञान २

॰आत्मभाव १

विशेषात्मभावनाया निवर्त्तते। चित्तमेव कर्तृ ज्ञातृ भोक्तृ इत्यभिमानो निवर्त्तते। तस्मिन् सति किं भवतीत्याह। तत
दा विवेकनिम्नं प्रथि वाहि बहिर्मुखं विषयोपभोगफलं चित्तमासीत् इदानीं विवेकनिम्नं विवेकनि
म्नमार्गवाहि अन्तर्मुखं कैवल्यप्राग्भारं कैवल्यफलं कैवल्यप्राग्भारं तदा संपद्यत इति॥ अस्मिंश्च विवेक
वाहिनि चित्ते ये अन्तरायाः प्रादुर्भवन्ति तेषां हेतुप्रतिपादनद्वारेण त्यागोपायमाह। तच्छिद्रेषु प्रत्य
यान्तराणि संस्कारेभ्यः॥ तस्मिन् समाधौ स्थितस्य छिद्रेषु अन्तरालेषु यानि प्रत्ययान्तराणि व्युत्थानरू
पाणि ज्ञानानि तानि प्राक्तनेभ्यो व्युत्थानानुभवजेभ्यः संस्कारेभ्यः अहं ममेत्येवं रूपाणि क्षीयमाणेभ्यो
ऽपि प्रभवन्ति। अन्तःकरणोच्छित्तिद्वारेण तेषां हानं कर्त्तव्यमित्युक्तं भवति। हानोपायश्च पूर्वमेवोक्त
इत्याह। हानमेषां क्लेशवदुक्तं यथा क्लेशानामविद्यादीनां हानं पूर्वमुक्तं। तथा संस्काराणामपि

॰वत् ३ ॰उक्तं ३

कर्त्तव्यं। यथा ते ज्ञानाग्निना प्लुष्टा दग्धबीजकल्पाः पुनश्चित्तभूमौ प्ररोहं न लभंते। तथा संस्कारा अ
पि एवं। स्वप्रत्ययांतराणामनुदये [illegible]विरोधे सति समाधौ यादृशो योगिनः समाधिप्रकर्षप्राप्तिर्भवति
तथाविधमुपायमाह। प्रसंख्यानेप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः॥ प्रसंख्यानं
यावतां तत्त्वानां यथाक्रमं व्यवस्थितानां परस्परविलक्षणस्वरूपपरिभावनं। तस्मिन्सत्यप्यकु
सीदस्य फलमलिप्सोः। प्रत्ययांतराणामनुदये सर्वप्रकारविवेकख्यातेः परिशेषाद्धर्ममेघः
समाधिर्भवति। प्रकृष्टमशुक्लकृष्णं धर्मं पुरुषार्थसाधकं मेहति सिंचतीति धर्ममेघः॥ अनेन प्र
कृष्टधर्मस्यैव ज्ञानहेतुत्वमित्युक्तं भवति। तस्माद्धर्ममेघात् किं भवतीत्याह। ततः क्लेशकर्म
निवृत्तिः। क्लेशानामविद्यादीनामस्मितामूलानां रागादीनामभिनिवेशांतानां। कर्मणां च शुक्ला

क्तएवमत्वा २

हितेदेनात्रिविधानांज्ञानोदयात्सर्वकारणानिवृत्त्यानिवृत्तिर्भवति।इत्यर्थः४। निवृत्तेषु तस्मुक्तिं तवतो
त्याह। तदासर्वावरणमलापेतस्यज्ञानस्यानंत्याज्ज्ञेयमल्पं।आव्रियतेचित्तमेभिरित्यावरणानि क्ले
शाःक्लेशापेतस्यविरहितस्यज्ञानस्यानन्त्यात्तदानन्तलक्षणंसदनन्तत्वेदाज्ज्ञेयमल्पं।ग्रा
नाम्नोंदर्भभवति। अतःकोऽपिनैवसर्वंज्ञेयंजानातीत्यर्थः४। ततःकिमित्याह। कृतार्थानांपरिणामक्र
मपरिसमाप्तिर्गुणानां।कृतानिष्पादितानिभोगापवर्गलक्षणानि।एतदर्थाःप्रयोजनंयैस्तेकृतार्थागु
णाःसत्वरजस्तमांसि।एषांपरिणामस्यानुक्रमपरिसमाप्तिर्भवतिलोष्टेनवंतांगिलावावहितिल
क्षणस्यक्रमस्यसमाप्तिर्भवति।तस्यपरिसमाप्तिर्निष्ठानपुनरुद्भवइत्यर्थः४। क्रमस्योक्तस्य
लक्षणमाह।क्षणप्रतियोगीपरिणामापरान्तनिर्ग्राह्यःक्रमः४।क्षणोऽल्पीयान्कालस्तस्यप्रतियोगीप्रति

प्रातिलोम्येन २

कृतेषु२

तियोर्ये कृतार्थाः विलष्टाः परिणामायास्तन्निर्वृत्तिः॥३४॥ क्रमभ्रष्टसूत्रे स्वक्षणोत्तु पश्चात्संकलनबुद्ध्या।
येऽस्तं ता। स्वलक्षणानीं क्रमस्त्वप्यस्यते। न स्वरूपस्तु तत्स्वक्रमः परिसमाप्तिः। इदानीं फलभूतस्य कैवल्यस्या
साधारणं स्वरूपमाह। उ पुरुषार्थशून्यानां प्रतिप्रसवः॥ कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति॥
समाप्तभोगापवर्गलक्षणपुरुषार्थानां गुणानां यः प्रतिप्रसवः प्रतिलोमपरिणामसमाप्तौ विकारानुद्भवः।
यदि वा चितिशक्तेर्वृत्तिसारूप्यनिवृत्तौ स्वरूपमात्रेऽवस्थानं तत्कैवल्यमुच्यते। न केवलमस्मद्दर्श
ने सेवनः कैवल्यावस्थायामेवंभूतश्चिद्रूपो यावद्दर्शनान्तरेष्वपि विमृश्यमाने एवंरूपमेवावतिष्ठ
ते। तथा हि। संसारदशायामात्माकर्तृत्वभोक्तृत्वानुसंधातृत्वमयः प्रतीयते। अयं यथायं यमेकस्यैव
ह्यस्य यथाविधो नश्या न्वदा ज्ञानलक्षणानेव पूर्वापरानुसंधानशून्यानां त्वावे नियतः कर्मफलसंबंधो।

ना८ यः प्रति५

पातं०
६६
69

नस्या हा कृतनाशाः कृताभ्यागमप्रसंगाद्ध्यं ध्येयेनैव शास्त्रोपदिष्टमनुष्ठितं कर्म तादृशे वलोकस्त्वैम
वेत्ता तस्य हिताहितप्राप्तिपरिहारार्थम् सर्वस्य प्रवृत्तिर्वर्तते । सर्वस्य च व्यवहारस्य हानोपादानल
क्षणस्य स्याऽनुसंधानेनैव व्याप्तत्वात् । ज्ञानक्षणानां परस्परं तदेनानुसंधानशून्यत्वात् तदुपलक्षण
लौकिकस्य विश्वव्यवहारस्यानुपपत्तेः । कर्त्रा लोकानुसंधाता ध्य॰ स्वसंवेद्यमाने निश्चयवस्थाप्यते । सोऽयं दृश्या
यां सूक्ष्मतयाप्यग्राहकलक्षणो व्यवहारा भावाद्वैतत्त्वमात्रमेव तथा व्यवस्थाप्यते । न च चित्तस्य चित्तिमा
त्रत्वेनैवोपपद्यते । न च परात्मसंवेदनेन । यस्माद्ग्रहणं विषयसमर्थत्वमेव चित्तरूपं नाम ग्राहकत्वं त
था हि ग्राह्यार्थस्य चित्ता गृह्यमाणोऽयमिति गृह्यते । घटस्तावद्गृह्यमाणमहमिति । न पुनः स्वग्रहणं न हि स्वतां
तस्वस्य तत्त्वानां ग्राह्यत्वं परस्यापि विज्ञानं कर्तृत्वं । अत एकस्मिन्समये ग्राह्यग्राहकर्तृभेदा

६६
६९

प

त्वाद्विद्वैवावशिष्यते। अतो मोक्षावस्थायां निवृत्ताधिकारेषु गुणेषु चिन्मात्ररूप एवात्मावतिष्ठते।
इत्येवं पुंसः संसारदशायां तु एवं प्रकृतेश्चैव कर्तृत्वं भोक्तृत्वं तु संबन्धात्त्वं विमर्शस्य उपपद्यते। तथा हि येयं

नि २

प्रकृत्या सहानादिः सांसर्गिकोऽध्यासो यः भोक्तृभावलक्षणः संबंधो विवेकाख्यातिमूलः। तस्मिन्सति उत्तरा
र्थकर्तृत्वयतारूपशक्तिद्वयसद्भावे यो महदादिलावेशपरिणामस्तिस्तस्याः संयोगमतिपदात्मनोऽधिष्ठा
तृत्वं चिच्छायासमर्पणसामर्थ्यं बुद्धिसत्वस्य च संक्रान्तचिच्छायाग्रहणसामर्थ्यं च पुरुषस्य बुद्धेर्योग्यं क

विस्८

र्तृत्वं भोक्तृत्वाध्यवसायस्तत एव अविवेकात्तु संधानमूलस्य व्यवहारस्य निष्पत्तेः। किमर्थैः फल्गुभिः। क
ल्पनाजालैः। यद्यपि तु न चैवं पुरुषस्य संगि ऽविवेकेन पारमार्थिकमात्मनः कर्तृत्वाद्यगम्। क्रियते। तदास्य
परिणामित्वप्रसंगः। परिणामित्वाद्या नित्यत्वं ततः तस्यात्मत्वमेव न स्यादिति। न ह्येकस्मिन्नेव समये ऐके

नैवरूपेण परस्परविभक्तावस्थासु सर्वाः संभवति। तथा हि। यच्छामवस्थायामात्मसमवेतं दुःखं तथा
उत्पन्नविच्छिन्नत्वं न तस्यामेवावस्थायां दुःखासुत्पन्नविरुत्वा। अतोऽवस्थानानात्वान्न दुःखिनस्यावस्थावान्ता
पितानात्वं। नानात्वे चैव परिणामित्वात्मात्मत्वंतापितित्वं। अत एव ब्रह्मवादिभिर्निर्मायिरात्मनः स
दैव संसारदशायामेकरूपत्वमंगीक्रियते। येनु वदंति वादिनः सच्चिदानंदमयत्वमात्मनो मोक्षे मर्थ्यन्ति।
तेषां न युक्तः। तथा हि। आनंदस्य सुखस्य रूपत्वात् सुखस्य च संवेदनं विषमानत्वे चैव जायते। पक्षे मांद्य
मानत्वं च संवेदनस्यानित्यकत्वादुपपन्नमिति संवेदनसंबंधयोरन्यथामादेहे न हानिः। अथ सुखा
त्मत्वमेव तस्योच्यते। तच्चिकधर्माध्यामादनुपपन्नं। न हि संवेद्यसंवेदनं च एकीत्वमर्हति। किंवा
द्वैतवादितिः कर्मात्मपरमात्मने वेदनात्मा द्विविधः दृश्यते। ...पेनैवरूपेण सुखदुःखयोनोक्तत्वं कर्मात्म

नष्टेनैवरूपेण यदि परमात्मनः स्यात्। तदा कर्मात्मवत्परमात्मनः परिणामित्वमविद्याद्यन्तावत्त्वं वा
स्यात्। अथ न तथापि सा नाशो कृतत्वं। किं न दृष्टो किं तत्सुदामी न तया धिक्यात्तत्वेन स्वीकरोति। तदा स्म
दृष्टान्तादुपदेशः। आनंदरूपतावत्सर्वमेवानित्यता कृता। किंवा विद्याद्यन्तावत्त्वे निःस्पृहत्वात्कर्मात्म
नां कः शास्त्राधिकारी। ततावत्सिद्धान्तविमुक्तत्वात्परमात्मा। नाप्यविद्याद्यन्तावत्त्वात्कर्मात्मा तत्र व
सकलशास्त्रविषयत्वप्रसंगः। अविद्यामयत्वे च जगतोऽपि क्रियमाणे कस्याविद्येति विचार्यते। ततावत्
परमात्मनो नित्यनिर्दुःखत्वात् द्विधारूपतावत्कर्मात्मनोऽपि च्छन्नावत्तया शुद्धविद्याप्रत्यये कथं
मविद्यया संबंधः शब्दयोऽप्यते। एतदेवाविद्याया अविद्यात्वं यदविचारितरमणीयत्वं नाम। तदुक्तं बाहिर्वि
चारेण दिनकरकर... नीहारनादिलयस्वरूपया तिसेवाविद्येत्युच्यते। नेवं। यद्युक्तं किं विकाय

पातं॰
६८
71

करोति। यद्दवश्यपंकुलषि क्लिष्टमनिर्बंधात्रकार्यं। अविद्यायाश्च संसारलक्षणस्य पश्चकार्यकर्तृत्वमव
श्यमा। कर्तव्यं तस्मिंश्च सत्यपि यद्यनिर्वाच्यत्वमुक्तं स्यात्। तदा कस्यचिदपि नाद्यत्वं न स्यादिह। ब्रह्मणोप्यवाच्य
ताऽसक्तिस्तस्मादधिष्ठानात्तद्रूपतायाति स्फोटानाद्येव तमसोरूपमवपद्यते। अधिष्ठातृत्वं च चिद्रूपत्व
मेवा तद्व्यतिरिक्तस्य धर्मस्य कस्यचिदत्र मानाभावप्रसंगे अपेक्षापि नैयायिकादिभिरात्मा चेतनतायोगाच्चेत
न इष्यते। चेतनापि तस्य मनःसंयोगजा। तथा हि इच्छाज्ञानप्रयत्नादयो गुणाः कश्यश्च व्यवहारदशायामा
मनःसंयोगा इत्यघातोते रन्वयसुतेः मूर्छावस्था कर्मालोकेति थपाक्षिप्तता मोक्षदशायां तु मिथ्याज्ञान
निवृत्तौ तन्मूलानां दोषाणामपि निवृत्तेस्तेषां बुद्ध्यादीनां विशेषगुणानामत्यंतोच्छित्तिर्मुक्तिरूपमा
त्रय तिष्ठत्येवमात्मनो [illegible] तेषां न [illegible] उपपन्नः। यत्तस्यां दशायां किमात्मभिन्न आत्मत्वं व्यापकत्वाद

२ यं

६८
म
७१

योऽणुणोप्याकाशादीनामपि संति। ... स्त्रैलक्षण्येमात्मनः किंचिद्रूपमवश्यमंगीक्रियतेत्वयां। आत्म
त्वलक्षणजातियोगः इति चेत्सर्वेष्वेवात्मसु जातियोगस्य संभवति। अतो जडेभ्यो वैलक्षण्यमात्मनोऽ
वश्यमंगीकर्तव्यं। तथाधिष्ठातृत्वं चिद्रूपतयैव घटते नान्यथा। यैरपि मीमांसकैः कर्मकर्तृरूप
आत्मांगीक्रियते। तेषामपि न सुसमंजसः पक्षः। तथा हि अहंप्रत्ययग्राह्य आत्मा इति तेषां प्रतिज्ञा। अहं
प्रत्यये च कर्तृत्वं चात्मन एव नैवेतद्विरुद्धत्वादुपपद्यते। कर्तृत्वं प्रमातृत्वं कर्मत्वं प्रमेयत्वं न चै
तद्विरुद्धधर्माध्यासः एकस्य घटते। यद्विरुद्धधर्माध्यासाक्रांतं न तदेकं यथा भावाभावौ। विरुद्धे
च कर्तृत्वकर्मत्वे अत्र योऽस्मते। न कर्तृत्वकर्मत्वयोर्विरोधः। किंतु कर्तृत्वकरणत्वयोः। नैतद्युक्तं। वि
रुद्धधर्माध्यासस्य तुल्यत्वात् कर्तृत्वकरणत्वयोरिव विरोधेन कर्तृत्वकर्मत्वयोः संप्रत्यहंप्रत्य

के २

पात॰
६९

72

यथाग्राहकत्वं परिहृत्यात्मनोऽधिष्ठातृत्वमेवोपपन्नं । तत्रैव मनस्त्वमेव । येऽपि द्रव्यपर्यायभेदेना
त्मनोऽर्थापकस्थशरीरपरिणामपरिणामित्वमिष्यात् । तेषामस्थानपराहतमेव पक्षः । परिणा
मित्वे विरूपहता हानिः । विरूपत्वात्तावेनं किमात्मनश्चात्वं । तस्मादात्मत्वमात्मनः स्थिता विरूपत्व
मेवात्मनोऽंगीकर्तव्यं । तत्राधिष्ठातृत्वमेवाकेवलकर्तृरूपमेवात्मानमिच्छंति । तथाहि विषयसंनि
धे ध्यैर्ज्ञानलक्षणं क्रियामात्मपदः । तस्मात् विषयसंवित्तिः फलं तस्यां च फलभूतायां संवित्तौ स्वरू
पं प्रकाशरूपतया प्रतिभासति । विषयस्य ग्राह्यतया आत्मनो ग्राहकत्वेन । घटमहं जानामीत्यनेना
कारेण तस्यां च सत्यवेष क्रियायाः करणं कर्तृत्वं चानवती । त्यजन्ति कर्तृत्वेनोच्छत्वं च आत्मनोरूपमिति ।
तदनुपपन्नं यस्मात्संवित्तीनां मध्ये किं कर्तृत्वं युगपत्त्मनि पद्यते । क्रमेण वा । युगपत्कर्तृत्वे ज्ञानानां तदे

६९
72

तात्कर्तृत्वं तस्य न स्यात्। अथ क्रमेण कर्तृत्वं तदेकरूपस्य न घटते। एकेन रूपेण चित्रस्य कर्तृत्वं तदेकरू
पस्य न घटते। एकेन रूपेण चित्रस्य कर्तृत्वं चित्रता एकस्य रूपस्य सदैव संनिहितत्वात् सर्वफलमेकरू
पं स्यात्। अथ नानारूपता तथा तस्य कर्तृत्वं न स्यात् परिणामित्वाच्च न चिद्रूपत्वं। अतश्चिद्रूपत्वमात्मन
ऽस्वच्छं न स्यात् कर्तृत्वं गौणं कर्तृत्वं यादृशमस्माभिः कर्तृत्वमात्मनः प्रतिपादितं। कूटस्थनित्य
स्य चिद्रूपस्य तदेवोपपन्नं। एतेन मध्यकाशस्य आत्मनो विषयसंवित्तिद्वारेण ग्राहकत्वमसिद्य
ज्यत इति ये वदंति। तेऽप्यनेनैव निराकृताः॥ केचिद्विमर्शात्मकत्वेनात्मनः शब्दमयत्वमिच्छंति तेषा
मुक्तं विमर्शव्यतिरेकेण चिद्रूपता निरूपयितुमशक्या जडाः खिलाः केवलं वाणे चिद्रूपत्वमस्ति अतः त
स्य विमर्शव्यतिरेकेण निरूप्यमाणं नात्मा यथावत् तिष्ठते। तदस्तु पातकं। इदमित्थमेवंरूपमिति यो विचा

पातं॰
७०

73

न२

र्शोऽसविमर्श उच्यते। स्वात्मनि ताथतिरेकाणां निरूप्यमाणानां यथा वर्तिष्यते। तथा हि आत्मनस्तु जाय

मानो विमर्शोऽहमवंच्छन्नऽत्यनेनाकारणोऽपि वेद्यते। ततस्वा हंशहमंतिनच्छा मलज्ञणस्यार्थस्य

तत्र स्फुरणात्तन्नविकल्परूपत्वमिति उक्तम्४। विकल्पस्य च भावमायामा बुद्धिधर्मो चित्धर्मः४। स्फुटस्तु

नित्यत्वेन न वितन्यते इदं देवैकरूपत्वाद्वाहंकारान्तु भावेऽश४। तदनेन सविमर्शत्वमात्मनः प्रतिपादयता

बुद्धिरिवात्मत्वेऽपि तया प्रतिपादिता४। न प्रकाशात्मनः परस्पर्शपदचस्य स्वरूपमवाप्तमिति। इदं

सर्वेष्वपि दर्शनेषु अधिष्ठातृत्वे विदायनार्थदात्मनो रूपस्य पपद्यते। अधिष्ठातृत्वं चिद्रूपत्वं तत्र

जडाद्वैलक्षण्यमेव चिद्रूपतया यदधितिष्ठति। न देवलोऽयतां नयोति। यस्त्वतिनाधिष्ठितं तदेव सकल

व्यवहारस्योऽयं न भवति। एवं च सति क्रियाकृतत्वात्सन्धानव्यापारनिवृत्तौ यदात्मनः कैवल्यमस्मा॰

ष्ठि२

७०
७३
व२

चेतनेन२

सिद्धं।तद्विहायदर्शनांतराणामपिनान्यागतिस्तस्मादिदमेवसूक्तमुक्तं।वृत्तिमा्त्यपरि
हारेणस्वरूपप्रतिष्ठाचितिशक्तिःकैवल्यंतदेवंसिद्ध्यंतरेभ्योविलक्षणांसर्वसिद्धिमूल
भूतांसमाधिसिद्धिमभिधायजात्यंतरपरिणामलक्षणस्यचसिद्धिविशेषस्यप्रकृत्यापूरम
मेवकारणमुपपाद्यधर्मादीनांप्रतिबंधकनिवृत्तिमात्रएवसामर्थ्यमितिप्रदर्श्यनिर्मा
णचित्तानामस्मितामात्राडुद्भवइत्युक्त्वातेषांचाध्यात्मिकचित्तमेवाधिष्ठायकमितिप्रद
र्श्ययोगिचित्तस्यचित्तांतरवैलक्षण्यमभिधायतत्कर्मणामलौकिकत्वंचोपपाद्य
विपाकानुगुणानांचवासनानामभिव्यक्तिसामर्थ्यंकार्यकारणयोरैक्यप्रतिपाद

पात
११
७५

यव कितानी २

नेनच्छ बहितानामपि बाह्यानामानंतत्येमुपपाद्यतामामानंत्येपि हेतुफलादिद्वारेणाद्य
नमुपदर्श्योऽतीतादिष्वध्वसु धर्म्याणां संज्ञावमुपपाद्य बिज्ञानवादं निराकृत्य साकारवा
दं स्वप्रति प्राप्य शुद्धचैतन्यस्य ज्ञातृत्वं स्याविन्नद्वारेणासकलय्य हारतिच्च त्रिमुपपाद्य पुरु
धर्मिद्वैधमाणामुपदर्श्य कैवल्यनिर्णयामदृशालिंशं स्वविद्वं क्रमिणोपयोगिनोऽर्थान
लिधायधर्मशास्त्रांतरेषु तद्व कैवल्यमुपपन्नमित्युपपाद्य कैवल्यस्य स्वरूपं निर्मितमि
तिथाक्रतः कैवल्यपादः ॥ ४ ॥ समर्थयप्य यप्र: ४ प्रतापवस्मतः ४ पादांत स्वाछिं नानिबिप्र
लक्ष्य मुक्तटेषु सर्व सुदधत्याज्ञां धरित्री त्रतश्र. ब्रह्म ज्ञमवाप्य सर्वं मममं वाटेवतापि त्रि

११
७४

पातं॰
७२

तामश्रीनोजमहापतिःफणिपतेः सूत्रेषु सूत्रविद्धाता॥ ब्रू॥ ब्रू॥ इति श्रीमहाराजाधिरा
जश्रीभोजदेवविरचितायां राजमार्तंडालिकानामां पातंजलियोगशास्त्रसूत्रवृत्तौ कैवल्यपा
दः ४ समाप्तश्चायं ग्रंथः॥ ब्रू॥ शुभं भवतु॥ ब्रू॥ ॥संवत् १५७० समये श्रीविन
सुदिवत्नायां शनिवासरे॥ ब्रू॥ महाराजाधिराज मञ्चविन ... मस्तिष्कारिष्ठनिजकुलकमल
चक्रमार्तलं कृत मट्टश्रीव तुर्मजोलिख्यो धितीः॥ ब्रू॥ कायस्थगौडावयपुत्र श्रीनामनानेदैः लिखि॥

योगशास्त्र राजमार्तंड भोजेक

४६ योगसूत्र वृत्ति १२६०

भोजीतां येनदंत राघवदेव ५४ ...

४२८४